CC-O. In Public Domain. Digitized by eGangotri

30

Sanskrit Self Teacher

Easy way to the study of Sanskrit.

Part 16 th.

Author

Dr. Pandit S. D. Satwalekar

Rs. 2-00

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Easy way to the
Study of Sanskrit

16

Sanskrit Self Teacher

PART 16

By

Dr. Pandit. S. D. SATWALEKAR

Sri Vidya Bharathi
Book Centre,
Bharathi Street,
SRINGERI - 577 139.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

The rest of the Conjugations of the roots.

In the previous parts, we have shown how to frame the forms of the roots of the 1st, 2nd, 4th, 6th and 10th conjugations. In this book we are going to show how to frame the forms of the roots of the 3rd, 5th, 7th, 8th and 9th conjugations. If the students learn this part also well, they will have acquired the knowledge of the verbal roots of all the conjugations; and by gaining this experience, the students will be conversant with the knowledge of the verbs,

Shripad Damodar Satwalekar

Second Edition 1989

*

Printed & Published by V. S. Satwalekar,
Swadhyaya Mandal, Bharat-Mudranalaya,
PARDI, Dist. Valsad (Gujarat) India

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sanskrit Self Teacher

PART 16

Lesson– 1

3rd conjugation परस्मैपदी roots

These 3rd conjugational roots have their first letter doubled when the suffix are added. For example दा = (to give) has its form as ददा + ति, The method of forming this form is दा दा, ददा + ति = ददाति. If the first letter has a long vowel on it, the long vowel will be shortened. According to this rule, दा दा becomes ददा; and adding ति suffix, ददाति is formed.

धा (to wear) has its form as दधा + ति. धाधा = धधा = दधा + ति = दधाति. The rule is the first letter of the verbal root after being doubled, should be replaced by the third letter of the same group of consonants. The letter ध is in the त group of the consonants. Therefore, the third letter of that group, द takes the place of ध i. e. ध goes away and द comes in its place. Thus धधा becomes दधा.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Another example– भी (to be afraid) भी भी; भि भी बि भी, बिभे + ति = बिभेति. भ, the first letter of the root after being doubled, which is of प group is replaced by the third letter of the same प group. So भ is changed into ब.

With regard to क group and letter ह: If the first letter of the root, after being doubled, belongs to क group, then it is replaced respectively by the च group i. e. क=च, ख=छ, ग=ज, घ=झ, ङ=ञ. For example गा– (to praise) गा गा, गगा, जगा, जिगा + ति = जिगाति. (some use it as जगाति. also). With regard to ह: If the first letter of the root after being doubled is ह, then firstly it is replaced by झ, according to क group rule and then ultimately to ज. For example हु (to give, to eat, to receive) हु हु = झुहु = जुहु = जुहो + ति = जुहोति. The students might remember, this method is also applied with the लिट् forms of the roots.

Now we give some more forms of the roots (This verb primarily bearing the original meaning as given above, is used secondrily also as जुहोति=giving oblation of Ghee etc. in the fire.)

परस्मैपद

'हु' (to give oblations)

१ लट् = १ जुहोति, जुहुतः, जुह्वति । २ जुहोषि, जुहुथः, जुहुथ । ३ जुहोमि जुहुवः, जुहुमः ॥

२ लोट् = १ जुहोतु, जुहुताम्, जुह्वतु । २ जुहुधि, जुहुतम्, जुहुत । ३ जुहवानि, जुहवाव, जुहवाम ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

३ लङ् = १ अजुहोत्, अजुहुताम्, अजुहवुः। २ अजुहोः, अजुहुतम्, अजुहुत। ३ अजुहवम्, अजुहुव, अजुहुम ॥

४ लिङ् = १ जुहुयात्; जुहुयाताम्, जुहुयुः। २ जुहुयाः, जुहुयातम्, जुहुयात। ३ जुहुयाम्, जुहुयाव, जुहुयाम ॥

५ लिट् = १ जुहाव, जुहुवतुः, जुहुवुः। २ जुहुविथ, जुहुवथुः, जुहुव। ३ जुहाव, जुहुविव जुहुविम ॥

१ जुहुवांचकार, जुहुवांचक्रतुः, जुहुवांचक्रुः। २ जुहुवांचकर्थ, जुहुवांचक्रथुः, जुहुवांचक्र, ३ जुहुवांचकार जुहुवांचकृव, जुहुवांचकृम ॥

६ लृट् = १ होष्यति, होष्यतः, होष्यन्ति। २ होष्यसि, होष्यथः, होष्यथ। २ होष्यामि, होष्यावः, होष्यामः ॥

The students can frame forms like the above and use them in sentences.

3rd conjugation परस्मैपदी Root

ऋ = (to go, to know) इयर्ति। आर। अर्ता। अरिष्यति।

किल् = (to know) चिकेति। चिकेत। केतिता। केतिष्यति।

गा = (to praise) जिगाति। जगौ। गाता। गास्यति।

घृ = (to leak, to shine) जिघर्ति। जघार। घर्ता। घरिष्यति।

पृ = (to protect, to complete) पिपर्ति। पपार। परिता। परिष्यति।

भी = (to be afraid of) बिभेति। बिभाय, बिभयांचकार। भेता। भेष्यति।

हा = (to give up) जहाति। जहौ। हाता। हास्यति।

हु = (to give, to give oblations) जुहोति। जुहाव, जुहवांचकार। होता। होष्यति।

ह्री = (to be ashamed of) जिह्रेति। जिह्राय, जिह्रयांचकार। ह्रेता। ह्रेष्यति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

संस्कृत–वाक्यानि

१ यजमानः यज्ञे आहुतीः जुहोति । ब्रह्मचारिणः अग्नौ आहुतीः जुह्वति । त्वं किं न होष्यसि ? ह्यः तत्र कः अजुहोत् ?

२ वीरः अशक्तान् पिपर्ति । स कं पपार ? ते सर्वेऽपि तान् पिप्रुः । त्वं परिष्यसि किम् ?

३ अहं चौरात् न बिभेमि । स व्याघ्रात् अपि न बिभेति । वीराः पुरुषाः कस्मिन् अपि युद्धे न बिभ्यति ।

Lesson– 2

3rd conjugation आत्मनेपदी roots

मा = (to measure) = मिमीते । ममे । माता । मास्यते ।

हा = (to go, to gain) जिहीते । जहे । हाता । हास्यते ।

Forms of these roots

'मा' – (to measure, to meet)

१ लट् = १ मिमीते, मिमाते, मिमते । २ मिमीषे, मिमाथे, मिमीध्वे । ३ मिमे, मिमीवहे, मिमीमहे ॥

२ लोट् = १ मिमीताम् मिमाताम्, मिमताम् । २ मिमीष्व, मिमाथाम्, मिमीध्वम् । ३ मिमै, मिमावहै, मिमामहै ॥

३ लङ् = १ अमिमीत, अमिमाताम्, अमिमत । २ अमिमीथाः, अमिमाथाम्, अमिमीध्वम् । ३ अमिमि, अमिमीवहि, अमिमीमही ॥

४ लिङ् = १ मिमीत, मिमीयाताम्, मिमीरन् । २ मिमीथाः, मिमीयाथाम् मिमीध्वम् । ३ मिमीय, मिमीवहि, मिमीमहि ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

'हा' – (to give up)

१ लट् = १ जिहीते, जिहाते, जिहते । २ जिहीषे, जिहाथे, जिहीध्वे । जिहे, जिहीवहे, जिहीमहे ॥

The students can forms of आत्मनेपदी roots as above.

संस्कृत–वाक्यानि

१ स्त्रियः सदा जिहेति । पुरुषाः कदापि न जिहति । ते सर्वे जिहयांचक्रुः । नारी ह्रेष्यति एव ।

२ ईश्वरः सर्वं चिकेति । मनुष्यः केन साधनेन एवं केतिष्यति ? योगी पुरुषः सर्वं मनोगतं चिकेत ।

३ स धान्यं मिमीते । अहं घृतं न अमिमि । त्वं मिमीष्व । ते भूमिं मिमताम् ॥

3rd conjugation उभयपदी roots

दा = (to give) ददाति, दत्ते । ददौ, ददे । दाता । दास्यति–ते ।

धा = (to wear to protect) दधाति, धत्ते । दधौ, दधे । धाता । धास्यति–ते ।

निज् = (to purify, to make strong) नेनेक्ति, नेनिक्ते । निनेज, निनिजे । नेक्ता । नेक्ष्यति–ते ।

भृ = (to wear, to protect) बिभर्ति, बिभृते । बभार, बभ्रे, बिभरांचकार–चक्रे । भर्ता । भरिष्यति–ते ।

विज् = (to separate) वेवेक्ति, विविक्ते । विवेज, विविजे । वेक्ता । वेक्ष्यति–ते ।

विष् = (to pervade) वेवेष्टि, वेविष्टे । विवेष, विविषे । वेष्टा । वेक्ष्यति–ते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

forms of the roots

लट् (परस्मैपद) = १ ददाति, दत्तः, ददति । २ ददासि, दत्थः, दत्थ । ३ ददामि, दद्वः, दम्मः ॥

(आत्मनेपद) = १ दत्ते, ददाते, ददते । २ दत्से, ददाथे, दद्ध्वे । ३ ददे, दद्वहे, दम्महे ।

लोट् (परस्मैपद) = १ ददातु, दत्ताम्, ददतु । २ देहि, दत्तम्, दत्त । ३ ददानि, ददाव, ददाम ॥

(आत्मनेपद) = १ दत्ताम्, ददाताम्, ददताम् । २ दत्स्व, ददाथाम्, दद्ध्वम् । ३ ददै, ददावहै, ददामहै ॥

लङ् (परस्मैपद) = १ अददात्, अदत्ताम्, अददुः । २ अददाः, अदत्तम्, अदत्त । ३ अददाम्, अदद्व, अदम्म ॥

(आत्मनेपद) = १ अदत्त, अददाताम्, अददत्त । २ अदत्थाः, अददाथाम्, अदद्ध्वम् । ३ अददि, अदद्वहि, अदम्महि ॥

'भृ' – (to wear)

लट् (परस्मैपद) = १ बिभर्ति, बिभृतः, बिभ्रति । बिभर्षि, बिभृथः, बिभृथ । ३ बिभर्मि, बिभृवः, बिभृमः ॥

(आत्मनेपद) = १ बिभृते, बिभ्राते, बिभ्रते । २ बिभृषे, बिभ्राथे, बिभृध्वे । ३ बिभ्रे, बिभृवहे, बिभृमहे ॥

लोट् (परस्मैपद) = १ बिभर्तु, बिभृताम्, बिभ्रतु । २ बिभृहि, बिभृतम्, बिभृत । ३ बिभराणि, बिभराव, बिभराम ।

(आत्मनेपद) = १ बिभृताम्, बिभ्राताम्, बिभ्रताम् । २ बिभृष्व, बिभ्राथाम्, बिभृध्वम् । ३ बिभरै, बिभरावहै, बिभरामहै ॥

Let the students try to frame forms like these.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

संस्कृत–वाक्यानि

१ स मह्यं धनं ददाति । ते तुभ्यं किं ददति ? राजा मह्यं सुवर्णस्यालंकारं अददात् ।

२ त्वं तस्य मूल्यं अधुना एव देहि । अहं तस्मै पुस्तकं ददामि । त्वं तस्मै किं ददासि ?

३ ईश्वरः स्थिरचरं सर्वं जगत् स्वशक्त्या बिभर्ति । त्वं किं बिभर्षि ? यथा राजा राष्ट्रं बिभर्ति तथा गृहस्थाः गृहं बिभ्रति ।

The students can construct sentences like these. Here ends the section of the 3rd conjugational root.

Lesson– 3

(Mahabharat Virat Parva ch. 5)

वैशंपायन उवाच

ते वीरा बद्धनिस्त्रिंशास्तथा बद्धकलापिनः ।
बद्धगोधांगुलित्राणाः कालिंदीमभितो ययुः ॥ १ ॥
ततस्ते दक्षिणं तीरमन्वगच्छन्पदातयः ।
निवृत्तवनवासा हि स्वराष्ट्रप्रेप्सवस्तदा ।
वसन्तो गिरिदुर्गेषु वनदुर्गेषु धन्विनः ॥ २ ॥

वैशम्पायनः उवाच अब्रवीत्— ते पांडवाः वीराः वीरपुरुषाः, बद्धनिस्त्रिंशाः बद्धखड्गाः, तथा बद्धकलापिनः बद्धकेशपाशाः, बद्धगोधांगुलित्राणाः गोधाचर्मणः अंगुलित्राणं बद्धं यैः ते, कालिन्दीं नदीं अभितः अभिमुखं कृत्वा ययुः जग्मुः ॥ १ ॥ ततः अनंतरं ते पदातयः एव पद्भ्यां एव गच्छन्तः कालिंदीनद्याः दक्षिणं तीरं अन्वगच्छन् अगच्छन् । तदा ते पांडवा निवृत्तवनवासाः वनवासात् निवृत्ताः स्वराष्ट्रं स्वकीयराज्यं प्रेप्सवः प्रकर्षेण इप्सवः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विध्यन्तो मृगजातानि महेष्वासा महाबलाः ।
उत्तरेण दशार्णांस्ते पंचालान्दक्षिणेन च ॥ ३ ॥
अन्तरेण यकृल्लोमाञ्शूरसेनांश्च पांडवाः ।
लुब्धा ब्रुवाणा मत्स्यस्य विषयं प्राविशन्वनात् ॥ ४ ॥
धन्विनो बद्धनिस्त्रिंशा विवर्णाः श्मश्रुधारिणः ।
ततो जनपदं प्राप्य कृष्णा राजानमब्रवीत् ॥ ५ ॥
पश्यैकपद्यो दृश्यन्ते क्षेत्राणि विविधानि च ।
व्यक्तं दूरे विराटस्य राजधानी भविष्यति ॥ ६ ॥
वसामेहापरां रात्रीं बलवान्मे परिश्रमः ।

युधिष्ठिर उवाच ।

धनंजय समुद्यस्य पाञ्चालीं वह भारत ।
राजधान्यां निवत्स्यामो विमुक्ताश्च वनादितः ॥ ७ ॥

गिरिदुर्गेषु पर्वतस्थानेषु वनदुर्गेषु वनदुर्गस्थानेषु वसन्तः ॥ २ ॥ ते महेष्वासाः महाधनुषर्धारिणः महाबलाः महाशक्तयः वनेषु मृगजातानि मृगसमूहान् शरैः विध्यन्तः ते उत्तरेण दशार्णान् देशान् तथा दक्षिणेन पंचालान् देशान् ॥ ३ ॥ अन्तरेण च यकृल्लोमान् शूरसेनान् देशान् कृत्वा ' वयं लुब्धाः लुब्धकाः व्याधाः ' इति ब्रुवाणाः कथयन्तः वनात् मत्स्यस्य विषयं देशं प्राविशन् प्रविष्टाः ॥ ४ ॥

धन्विनः धनुष्मन्तः बद्ध-निस्त्रिंशाः खड्गधारिणः विवर्णाः शोभनवर्णरहिताः श्मश्रुधारिणः ते पांडवाः आसन् । ततः मत्स्यस्य नगरं प्राप्य राजानं धर्मराजानं कृष्णा द्रौपदी अब्रवीत् कथयामास ॥ ५ ॥ पश्य एकपद्यः एकपादपरिमिताः मार्गाः एकपद्यः पदव्यः दृश्यन्ते, अवलोक्यन्ते विविधानि च क्षेत्राणि च दृश्यन्ते, अतः अनेन चिह्नेन व्यक्तं स्पष्टं भवति यत् विराटस्य राज्ञः राजधानी राजनगरी दूरे एव भविष्यति ॥ ६ ॥ अतः इह एव अपरां रात्रिं वसामः, यतः मे बलवान् परिश्रमः जातः ॥

युधिष्ठिर उवाच- हे भारत धनंजय अर्जुन ! त्वं पांचालीं द्रौपदीं समुद्यस्य वह । इतः वनात् अस्मात् अरण्यात् विमुक्ताः च राजधान्यां निवत्स्याम ॥ ७ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वैशंपायन उवाच ।

तामादायार्जुनस्तूर्णं द्रौपदीं गजराडिव ।
संप्राप्य नगराभ्यासमवतारयदर्जुनः ॥ ८ ॥
स राजधानीं संप्राप्य कौन्तेयोऽर्जुनमब्रवीत् ।
कायुधानि समाधाय प्रवेक्ष्यामः पुरं वयम् ॥ ९ ॥
सायुधाश्च प्रवेक्ष्यामो वयं तात पुरं यदि ।
समुद्वेगं जनस्यास्य करिष्यामो न संशयः ॥ १० ॥
गाण्डीवं च महद्गाढं लोके च विदितं नृणाम् ।
तच्चेदायुधमादाय गच्छामो नगरं वयम् ॥ ११ ॥
ततो द्वादशवर्षाणि प्रवेष्टव्यं वने पुनः ।
एकस्मिन्नपि विज्ञाते प्रतिज्ञातं हि नस्तथा ॥ १२ ॥

वैशम्पायन उवाच— अर्जुनः गजराट् इव तूर्णं सत्वरं तां द्रौपदीं आदाय गृहीत्वा नगराभ्यासं नगरसमीपं संप्राप्य अर्जुनः तां अवतारयत् ॥ ८ ॥ सः धर्मराजः कौन्तेयः कुन्तीपुत्रः राजधानीं संप्राप्य अर्जुनं अब्रवीत् । आयुधानि अत्र समाजस्य स्थापयित्वा वयं पुरं प्रवेक्ष्यामः ? ॥ ९ ॥

हे तात ! यदि वयं सायुधाः आयुधैः सहिताः पुरं प्रवेक्ष्यामः तर्हि अस्य जनस्य समुद्वेगं करिष्यामः अत्र न संशयः ॥ १० ॥ गांडीवं गांडीवनामकं धनुः महद्गाढं अतिवृढं अस्ति लोके च नृणां मनुष्याणां तत्सर्वं विदितं प्रसिद्धं अस्ति । तत् आयुधं आदाय वयं नगरं गच्छामः चेत् ॥ ११ ॥ ततः एकस्मिन् अपि विज्ञाते पुनः अस्माभिः वने द्वादशवर्षाणि प्रवेष्टव्यं भविष्यति यतः तथा नः प्रतिज्ञातम्, तथा अस्माभिः प्रतिज्ञा कृता ॥ १२ ॥

समासः

१ बद्धनिस्त्रिंशाः	= बद्धाः निस्त्रिंशाः यैः ।
२ बद्धगोधांगुलित्राणाः	= बद्धानि गोधांगुलित्राणानि यैः ।
३ निवृत्तवनवासाः	= वनवासात् निवृत्तः ।
४ स्वराष्ट्रं	= स्वस्य राष्ट्रम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

५ सायुधाः = आयुधैः सहिताः ।
६ द्वादशवर्षाणि = द्वादश च तानि वर्षाणि ।

Lesson– 4

5th conjugation roots

5th conjugation 'नु' is the विकरण of the roots which comes before the tense suffix. The forms are as under

'साध्' (to achieve)

१ लट् = १ साध्नोति, साध्नुतः, साध्नुवन्ति । २ साध्नोषि, साध्नुथः, साध्नुथ । ३ साध्नोमि, साध्नुवः, साध्नुमः ॥

२ लोट् = १ साध्नोतु, साध्नुताम्, साध्नुवन्तु । २ साध्नुहि साध्नुतम्, साध्नुत । ३ साध्नवानि, साध्नवाव, साध्नवाम ॥

३ लङ् = १ असाध्नोत्, असाध्नुताम्, असाध्नुवन् । २ असाध्नोः, साध्नुयातम्, असाध्नुत । ३ असाध्नुवम्, असाध्नुव, असाध्नुम ॥

४ विधिलिङ् = १ साध्नुयात्, साध्नुयाताम्, साध्नुयुः । २ साध्नुयाः, साध्नुयातम्, साध्नुयात । ३ साध्नुयाम्, साध्नुयाव, साध्नुयाम ॥

In this way the forms of the other 5th conjugation roots are framed. Now see—

१ लट् = ('आप्' root) १ आप्नोति, आप्नुतः, आप्नुवन्ति । २ आप्नोषि, आप्नुथः, आप्नुथ । ३ आप्नोमि, आप्नुवः, आप्नुमः ॥

२ लोट् = ('साध्' root) १ साध्नोतु, साध्नुताम्, साध्नुवन्तु । २ साध्नुहि; साध्नुतम्, साध्नुत । ३ साध्नवानि, साध्नवाव, साध्नवाम ॥

Now see the following roots—

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

5th conjugation परस्मैपदी roots.

आप् = (to pervade) आप्नोति । आप । आप्ता । आप्स्यति ।

(वि उपसर्गपूर्वक) = व्याप्नोति । व्याप । व्याप्ता । व्याप्स्यति ।

ऋध् = (to increase) ऋध्नोति । आनर्ध । अर्धिता । अर्धिष्यति ।

तृप् = (to be satisfied) तृप्नोति । ततर्प । तर्पिता । तर्पिष्यति ।

दु = (to give trouble) दुनोति । दुदाव । दोता । दोष्यति ।

दृ = (to kill) दृणोति । ददार । दर्ता । दरिष्यति ।

राध् = (to make ready,to complete) राध्नोति । रराध । राद्धा । रात्स्यति ।

शक् = (to be strong) शक्नोति । शशाक । शक्ता । शक्यति ।

साध् = (to achieve) साध्नोति । ससाध । साद्धा । सात्स्यति ।

हि = (to go, to increase) हिनोति । जिघाय । हेता । हेष्यति ।

संस्कृत–वाक्यानि

१ मनुष्यः स्वकीयस्य कर्मणः फलं आप्नोति । बालकः वृक्षस्य फलं न आप्नोत् । स धनं प्राप्नोति ।

२ अहं तत्कर्म कर्तुं न शक्नोमि । त्वं शक्नोषि किम् ? यः न शक्नोति, स तत्र मा गच्छतु ।

३ स साधकः साध्यं साधनेन साध्नोति । सर्वेऽपि तथैव साध्नुवन्तु ।

४ त्वं कथं तत् राध्नोषि ? स न अराध्नोत् । त्वं राध्नुहि, सः अपि राध्नोतु ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

5th Conjugational आत्मनेपदी Roots

अश् = (व्यापना) अश्नुते । आनशे । अशिता, अष्टा । अशिष्यते, अक्ष्यते ।

More forms of 'अश्' root are also framed in the following way

१ लट् = १ अश्नुते, अश्नुवाते, अश्नुवते । २ अश्नुषे, अश्नुवाथे, अश्नुध्वे । ३ अश्नुवे, अश्नुवहे, अश्नुमहे ॥

२ लोट् = १ अश्नुताम्, अश्नुवाताम्, अश्नुवताम् । २ अश्नुष्व, अश्नुवाथाम्, अश्नुध्वम् । ३ अश्नवै, अश्नवावहै, अश्नवामहै ॥

३ लङ् = १ आश्नुत, आश्नुवाताम्, आश्नुवत । २ आश्नुथाः, आश्नुवाथाम्, आश्नुध्वम् । ३ आश्नुवि, आश्नुवहि, आश्नुमहि ॥

४ विधिलिङ् = अश्नुवीत, अश्नुवीयाताम्, अश्नुवीरन् । २ अश्नुवीथाः, अश्नुवीयाथाम्, अश्नुवीध्वम् । ३ अश्नुवीय, अश्नुवीवहि, अश्नुवीमहि ॥

संस्कृत–वाक्यानि

१ पुरुषः अन्नं सायं–प्रातः अश्नुते । स्त्रीपुरुषौ फलानि अश्नुवाते । सर्वे बालकाः मिष्टं अश्नुवते ।

२ स भोजनं अद्य अश्नुताम् । त्वं अन्नं अद्य अश्नुथाः । यूयं फलानि अश्नुध्वम् ।

5th conjugational उभयपदी Roots

कृ = (to kill) कृणोति, कृणुते । चकार, चक्रे । कर्ता । करिष्यति–ते ।

चि = (to collect) = चिनोति, चिनुते । चिकाय, चिक्ये, चिचाय, चिच्ये । चेता । चेष्यति–ते ।

धु = (to shake) = धुनोति, धुनुते । दुधाव, दुधुवे । धोता । धोष्यति–ते ।

मि = (to throw)=मिनोति, मिनुते । मम्यौ, मिम्ये । माता । मास्यति–ते ।

वृ = (to choore) = वृणोति, वृणुते । ववार, वव्रे । वरिता । वरीता । वरिष्यति–ते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

शि = (to sharpen) = शिनोति, शिनुते । शिशाय, शिश्ये । शेता । शेष्यति–ते ।

षि = (to tie) = सिनोति, सिनुते । सिषाय, सिष्ये । सेता । सेष्यति–ते ।

सु = (to bathe, to extract juice) = सुनोति, सुनुते । सुषाव, सुषुवे । सोता । सोष्यति–ते ।

स्तृ = (to cover) = स्तृणोति, स्तृणुते । तस्तार, तस्तरे । स्तर्ता । स्तरिष्यति–ते ।

forms of उभयपदी roots

'चि' = (to collect)

(१) लट्

(परस्मै०) = १ चिनोति, चिनुतः, चिन्वन्ति ।
२ चिनोषि, चिनुथः, चिनुथ ।
३ चिनोमि, चिनुवः, चिनुमः ॥

(आत्मने०) = १ चिनुते, चिन्वाते, चिन्वते ।
२ चिनुषे, चिन्वाथे, चिनुध्वे ।
३ चिन्वे, चिनुवहे, चिनुमहे ॥

(२) लोट्

(परस्मै०) = १ चिनोतु, चिनुताम्, चिन्वन्तु ।
२ चिनु, चिनुतम्, चिनुत ।
३ चिनवानि, चिनवाव, चिनवाम ॥

(आत्मने०) = १ चिनुताम्, चिन्वाताम्, चिन्वताम् ।
२ चिनुष्व, चिन्वाथाम्, चिनुध्वम् ।
३ चिनवै, चिनवावहै, चिनवामहै ॥

(३) लङ्

(परस्मै०) = १ अचिनोत्, अचिनुताम्, अचिन्वन् ।
२ अचिनोः, अचिनुतम्, अचिनुत ।
३ अचिनवम्, अचिनुव, अचिनुम ॥

Sri Vidyabharati Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

(आत्मने०) = १ अचिनुत, अचिन्वाताम्, अचिन्वत ।
२ अचिनुथाः, अचिन्वाथाम्, अचिनुध्वम् ।
३ अचिन्वि, अचिनुवहि, अचिनुमहि ॥

(४) विधिलिङ्

(परस्मै०) = १ चिनुयात्, चिनुयाताम्, चिनुयुः ।
२ चिनुयाः चिनुयाताम्, चिनुयात ।
३ चिनुयाम्, चिनुयाव, चिनुयाम ॥

(आत्मने०) = १ चिन्वीत, चिन्वीयाताम्, चिन्वीरन् ।
२ चिन्वीथाः, चिन्वीयाथाम्, चिन्वीध्वम् ।
३ चिन्वीय, चिन्वीवहि, चिन्वीमहि ॥

The students may use this way the उभयपदी roots mentioned above and forms can be formed and sentences made.

संस्कृत–वाक्यानि

१ बालकाः फलानि चिन्वन्ति । सः पुष्पाणि अचिनोत् । अहं अद्य फलानि न चिनोमि ।

२ वायुः वृक्षान् धुनोति । आकाशे वायुः अभ्राणि धुनुते । त्वं कथं एवं वस्त्रं धुनोषि ?

३ पुरुषः कन्यां वृणुते । प्रजाजनाः राजानं राष्ट्राय वृण्वन्ति । त्वं कथं अवृणुथाः ?

४ ब्राह्मणाः सोमं सुन्वन्ति । सः औषधिं असुनोत् । स सुनोतु । त्वं न सुनुहि ।

५ स वस्त्रेण तत् स्तृणोति । पश्य कथं स स्तृणुते । यथा स स्तृणोति तथा त्वमपि स्तृणुहि ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Lesson– 5

(Mahabharat Udyogaparva ch. 38)

अपकृत्य बुद्धिमतो दूरस्थोऽस्मीति नाश्वसेत् ।
दीर्घौ बुद्धिमतो बाहू याभ्यां हिंसति हिंसितः ॥ ८ ॥
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ ९ ॥
अनीर्षुर्गुप्तदारश्च संविभागी प्रियंवदः ।
श्लक्ष्णो मधुरवाक् स्त्रीणां न चासां वशगो भवेत् ॥ १० ॥
पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः ।
स्त्रियः श्रिय गृहस्योक्तास्तस्माद्रक्ष्या विशेषतः ॥ ११ ॥
पितुरन्तःपुरं दद्यान्मातुर्दद्यान्महानसम् ।
गोषु चात्मसमं दद्यात्स्वयमेव कृषिं व्रजेत् ॥ १२ ॥

बुद्धिमतः ज्ञानसंपन्नान् पुरुषान् अपकृत्य पीडयित्वा 'अहं दूरस्थः दूरे अवस्थितः अस्मि' अतः अहं सुरक्षितोऽस्मि इति मत्वा नाश्वसेत् न विश्वसेत्। बुद्धिमतः ज्ञानिनः मनुष्यस्य दीर्घौ बाहू, याभ्यां बाहुभ्यां हिंसितः बुद्धिमान् पुरुषः पीडयितारं निश्चयेन हिंसति ॥८॥ अविश्वस्ते विश्वासरहिते अविश्वासयोग्ये कदाऽपि न विश्वसेत्, विश्वस्ते विश्वासयोग्येऽपि नैव अतिविश्वसेत् न अतिशयेन विश्वसेत्। अतिविश्वासात् यद् भयं उत्पन्नं भवति तत् मूलानि अपि निकृन्तति निःशेषेण छिनत्ति ॥ ९ ॥ अनीर्षुः ईर्ष्यारहितः, गुप्तदारः रक्षिताः दाराः स्त्रियः धर्मपत्न्यः येन सः गुप्तदारः संविभागी प्राप्तधनस्य योग्यविभागकर्ता, प्रियंवदः प्रियवादी, श्लक्ष्णः कोमलः, स्त्रीणां मधुरवाक् मधुरवचनः, तथापि आसां स्त्रीणां वशगः वशवर्ती न भवेत् ॥ १० ॥ पूजनीयाः महाभागाः महाभाग्यवत्यः, पुण्याः गृहदीप्तयः गृहप्रकाशकाः, स्त्रियः सन्ति, ताः गृहस्य श्रियः एव सन्ति, तस्मात् ताः विशेषतः रक्ष्याः ॥ ११ ॥ अन्तःपुरं पितुः दद्यात् मातुः च महानसं पाकशालां दद्यात् गोषु आत्मसमं मित्रं दद्यात्, स्वयं एव कृषिं व्रजेत् गच्छेत् ॥ १२ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

भृत्यैर्वाणिज्यचारं च पुत्रैः सेवेत च द्विजान् ।
अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ॥ १३ ॥
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ।
नित्यं सन्तः कुले जाताः पावकोपमतेजसः ॥ १४ ॥
क्षमावन्तो निराकाराः काष्ठेऽग्निरिव शेरते ।
यस्य मन्त्रं न जानन्ति बाह्याश्चाभ्यन्तराश्च ये ॥ १५ ॥
स राजा सर्वतश्चक्षुश्चिरमैश्वर्यमश्नुते ।
करिष्यन्न प्रभाषेत कृतान्येव तु दर्शयेत् ॥ १६ ॥
धर्मकामार्थकार्याणि तथा मंत्रो न भिद्यते ।
गिरिपृष्ठमुपारुह्य प्रासादं वा रहोगतः ॥ १७ ॥
अरण्ये निःशलाके वा तत्र मन्त्रो विधीयते ।
नासुहृत्परमं मन्त्रं भारतार्हसि वेदितुम् ॥ १८ ॥

भृत्यैः परिचारकैः वाणिज्यचारं व्यवहारं सेवेत, द्विजान् पुत्रैः सेवेत । अद्भ्यः जलात् अग्निः, ब्रह्मतः ब्राह्मणात् क्षत्रं क्षत्रियः, अश्मनः प्रस्तरात् लोहं उत्थितम् ॥ १३ ॥ तेषां अग्निक्षत्रियलोहानां तेजः यद्यपि सर्वत्रगं सर्वत्र संचारि वर्तते, तथापि स्वासु योनिषु स्वकीयोत्पत्तिस्थानेषु शाम्यति । कुले जाताः श्रेष्ठे कुले उत्पन्नाः सन्तः पावकोपमतेजसः अग्निवत्प्रकाशकाः ॥ १४ ॥ क्षमावन्तः क्षमायुक्ताः, काष्ठे अग्निः इव, यथा काष्ठे अग्निः अव्यक्तरूपेण भवति तथैव निराकाराः अव्यक्ताः शेरते वसन्ति । बाह्याः अभ्यन्तराश्च ये पुरुषाः यस्य मन्त्रं विचारं न जानन्ति ॥ १५ ॥ स राजा सर्वतश्चक्षुः सर्वत्र-दृष्टिः ऐश्वर्यं प्रभुत्वं चिरं चिरकालं अश्नुते प्राप्नोति । करिष्यन् कर्म कर्तुं इच्छन् कदापि न प्रभाषेत, कृतानि एव तु कर्माणि दर्शयेत् ॥ १६ ॥ धर्म-कामार्थकार्याणि धर्मार्थकामसंबंधीनि कर्माणि पूर्णतया कृत्वा एव तत्पश्चात् लोकेषु दर्शयितव्यानि । गिरिपृष्ठं पर्वतशिखरं उपारुह्य, आरुह्य, प्रासादं हर्म्यं राजभवनं वा रहोगतः एकान्तस्थाने गतः ॥ १७ ॥ निःशलाके एकान्ते रहसि अरण्ये वा एवंविधे स्थाने मंत्रः गुप्तविचारः विधीयते क्रियते । हे भारत ! भरतकुलोत्पन्न ! परमं श्रेष्ठं मन्त्रं अमित्रो असुहृत् वेदितुं ज्ञातुं नार्हसि ॥ १८ ॥

CC-O. Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अपण्डितो वाऽपि सुहृत्पण्डितो वाऽप्यनात्मवान् ।
नापरीक्ष्य महीपालः कुर्यात्सचिवसंग्रहम् ॥ १९ ॥
अमात्ये ह्यर्थलिप्सा च मंत्ररक्षणमेव च ।
कृतानि सर्वकार्याणि यस्य पारिषदा विदुः ॥ २० ॥
धर्मे चार्थे च कामे च स राजा राजसत्तमः ।
गूढमंत्रस्य नृपतेस्तस्य सिद्धिरसंशयम् ॥ २१ ॥
अप्रशस्तानि कार्याणि यो मोहादनुतिष्ठति ।
स तेषां विपरिभ्रंशाद् भ्रश्यते जीविताद्पि ॥ २२ ॥
कर्मणां तु प्रशस्तानामनुष्ठानं सुखावहम् ।
तेषामेवानुष्ठानं पश्चात्तापकरं मतम् ॥ २३ ॥
अनधीत्य यथा वेदान्न विप्रः श्राद्धमर्हति ।
एवमश्रुतषाड्गुण्यो न मंत्रं श्रोतुमर्हति ॥ २४ ॥
स्थानवृद्धिक्षयज्ञस्य षाड्गुण्यविदितात्मनः ।
अवज्ञातशीलस्य स्वाधीना पृथिवी नृप ॥ २५ ॥

अपंडितः अज्ञानः वा अपि सुहृत् मित्रं, पंडितो वाऽपि अनात्मवान् आत्मबलरहितः । महीपालः सचिवं संग्रिणं अपरीक्ष्य परीक्षां न कृत्वा न कुर्यात् ॥ १९ ॥ अमात्ये हि अर्थलिप्सा अर्थलाभेच्छा तथा मंत्ररक्षणं गुह्यविचारस्य रक्षणं तथा च यस्य पारिषदाः सभ्याः कृतानि एव सर्वकार्याणि विदुः ॥ २० ॥ स राजा धर्मे च अर्थे च कामे च राजसत्तमः राजश्रेष्ठः भवति । गूढमंत्रस्य तस्य नृपतेः असंशयं सिद्धिः भवति ॥ २१ ॥ यः राजा मोहात् अप्रशस्तानि कार्याणि अनुतिष्ठति करोति स तेषां कार्याणां विपरिभ्रंशात् जीविताद् अपि भ्रश्यते ॥ २२ ॥ प्रशस्तानां कर्मणां अनुष्ठानं तु सुखावहं सुखकारकम् । तेषां प्रशस्तानां कर्मणां अननुष्ठानं अनुष्ठानस्य अकरणं पश्चात्तापकरं मतम् ॥ २३ ॥ यथा वेदान् अनधीत्य न अधीत्य विप्रः श्राद्धं न अर्हति । एवं एव अश्रुतषाड्गुण्यः षड्गुणानां अपरिज्ञाता मंत्रं श्रोतुं न अर्हति ॥ २४ ॥ हे नृप ! स्थानवृद्धिक्षयज्ञस्य षाड्गुण्यविदितात्मनः षड्गुणज्ञानयुक्तस्य अनयज्ञातशीलस्य प्रशस्तशीलस्य राज्ञः सर्वा अपि पृथिवी स्वाधीना भवति ॥२५॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

समासाः

१ अविश्वस्तः = न विश्वस्तः ।
२ गुप्तदारः = गुप्ताः दाराः यस्य ।
३ मधुरवाक् = मधुरा वाक् यस्य ।
४ सर्वत्रगम् = सर्वत्र गच्छति इति ।
५ गिरिपृष्ठम् = गिरेः पृष्ठम् ।
६ गूढमंत्रः = गूढः मंत्रः यस्य ।
७ अश्रुतषाड्गुण्यः = अश्रुतं षाड्गुण्यं येन ।
८ अनयज्ञातशीलः = अनयज्ञातं शीलं यस्य ।
९ पश्चात्तापकरं = पश्चात्तापं करोति इति ।
१० सुखावहं = सुखं आवहति इति ।
११ अनधीत्य = न अधीत्य ।
१२ स्थानवृद्धिक्षयज्ञः = स्थानं च वृद्धिश्च क्षयश्च स्थानवृद्धिक्षयाः तेषां ज्ञाता ।

Lesson– 6

7th Conjugational roots

'न' is the विकरण of this 7th conjugational root. It is applied in between the last vowel of the root and the last consonant. of the same root. see—

हिंस् = (to kill) = हिंस् + न = हि (न) स् = हिनस् + ति = हिनस्ति ।

कृत् = (to cut) = कृत् + न = कृ, (न) त्=कृणत् + ति = कृणति ।

The forms are framed in this way. Now see their forms—

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

'पिष्' = (To powder)

१ लट् = १ पिनष्टि, पिंष्टः, पिंषन्ति । २ पिनक्षि, पिंष्ठः, पिंष्ठ ।
३ पिनष्मि, पिंष्वः, पिंष्मः ॥

२ लोट् = १ पिनष्टु, पिंष्टाम्, पिंषन्तु । २ पिंड्ढि, पिंष्टम्, पिंष्ट ।
३ पिनषाणि, पिनषाव, पिनषाम ॥

३ लङ् = १ अपिनट्, अपिंष्टाम्, अपिषन् । २ अपिनट्, अपिंष्टम्,
अपिंष्ट । ३ अपिनषम् अपिंष्व, अपिंष्म ॥

४ विधिलिङ् = १ पिंष्यात्, पिंष्याताम्, पिंष्युः । २ पिंष्याः, पिंष्यातम्,
पिंष्यात । ३ पिंष्याम्, पिंष्याव, पिंष्याम ॥

'हिंस्' = (to kill)

१ लट् = १ हिनस्ति, हिंस्तः, हिंसन्ति । २ हिनस्सि, हिंस्थः, हिंस्थ ।
३ हिनस्मि, हिंस्वः हिंस्मः ॥

२ लोट् = १ हिनस्तु, हिंस्ताम्, हिंसन्तु । २ हिन्धि, हिंस्तम्, हिंस्त ।
३ हिनसानि, हिनसाव, हिनसाम ॥

३ लङ् = १ अहिनत्, अहिंस्ताम्, अहिंसन् । २ अहिनः, अहिंस्तम्,
अहिंस्त । ३ अहिनसम्, अहिंस्व, अहिंस्म ॥

४ विधिलिङ् = १ हिंस्यात्, हिंस्याताम्, हिंस्युः । २ हिंस्याः, हिंस्यातम्,
हिंस्यात । ३ हिंस्याम्, हिंस्याव, हिंस्याम ॥

'अञ्ज्' = (to oil)

१ लट् = १ अनक्ति, अङ्क्तः, अञ्जन्ति । २ अनक्षि, अङ्क्थः, अङ्क्थ ।
३ अनज्मि, अञ्ज्वः, अञ्ज्मः ॥

२ लोट् = १ अनक्तु, अङ्क्ताम्, अञ्जन्तु । २ अङ्ग्धि, अङ्क्तम् अङ्क्त ।
३ अनजानि, अनजाव, अनजाम ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

३ लङ् = १ आनक्, आङ्क्षताम्, आञ्जन्। २ आनक्, आङ्क्षतम्, आङ्क्ष। ३ आनजम्, आञ्ज्व, आञ्ज्म॥

४ विधिलिङ् = १ अञ्ज्यात्, अञ्ज्यातां, अञ्ज्युः। २ अंज्याः, अंञ्ज्यातम्, अञ्ज्यात। ३ अञ्ज्याम्, अञ्ज्याव, अञ्ज्याम॥

7th conjugation परस्मैपदी root

अञ्ज् = (to use collyrium, to oil) अनक्ति। आनक्। अङ्क्ता, अञ्जिता। अञ्जिष्यति, अङ्क्ष्यति।

उन्द् = (to soak) उनत्ति। उन्दाञ्चकार। उन्दिता। उन्दिष्यति।

कृत् = (to cut) कृणत्ति। चकर्त। कर्तिता। कर्तिष्यति।

पृच् = (to smear) पृणक्ति। पपर्च। पर्चिता। पर्चिष्यति।

भञ्ज् = (to break) भनक्ति। बभञ्ज। भङ्क्ता। भङ्क्ष्यति।

वृज् = (to keep off) वृणक्ति। ववर्ज। वर्जिता। वर्जिष्यति।

शिष् = (to remain) शिनष्टि। शिशेष। शेष्टा। शेक्ष्यति।

हिंस् = (to kill) हिनस्ति। जिहिंस्। हिंसिता। हिंसिष्यति।

संस्कृत-वाक्यानि

१ व्याधः अरण्ये आरण्यान् पशून् हिनस्ति। त्वं तत्र किं हिनस्सि? क्षत्रियः प्रजाः मा हिनस्तु। अहं कदापि न हिनस्मि।

२ भृत्यः धान्यं पिनष्टि। यथा स यंत्रेण पिनष्टि तथा कः हस्तेन पिंष्यात्?

३ कः काष्ठं कृणत्ति? त्वष्टा तत्र किं कृणत्ति? यदा स तत्र कृणत्ति तदा त्वं किं न कृणत्सि?

४ वायुः वृक्षान्भनक्ति। वायुः सर्वान् वृक्षान् बभञ्ज। त्वं किमर्थं तद् भङ्क्ष्यसि?

In this way use the roots in sentences.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

7th conjugation आत्मनेपदी root

इन्ध् = (to shine) इन्धे। इन्धांचक्रे। इन्धिता। इन्धिष्यते।

विद् = (to consider) विन्ते। विविदे। वेत्ता। वेत्स्यते।

The forms are as below–

'इन्ध्' = (to shine)

१ लट् = १ इन्धे, इन्धाते, इन्धते। २ इन्त्से, इन्धाते, इन्ध्वे। ३ इन्धे, इन्ध्वहे, इन्ध्महे॥

२ लोट् = १ इन्द्धाम्, इन्धाताम्, इन्धताम्। २ इन्त्स्व; इन्धायाम्, इन्ध्वम्। ३ इनधै, इनधावहै, इनधामहै॥

३ लङ् = १ ऐन्द्ध, ऐन्धाताम्, ऐन्धत। २ ऐन्द्धाः, ऐन्धायाम्, ऐन्ध्वम्। ३ ऐन्धि, ऐन्ध्वहि, ऐन्ध्महि॥

४ विधिलिङ् = १ इन्धीत, इन्धीयाताम्; इन्धीरन्। २ इन्धीथाः, इन्धीयाथाम्, इन्धीध्वम्। ३ इन्धीय, इन्धीवहि, इन्धीमहि॥

संस्कृत–वाक्यानि

१ ऋत्विजः अग्निं इन्धते। ते पुरुषाः अग्निं ऐन्धत। अहं इन्धे, त्वं इन्त्से, स इन्धे।

२ स विन्ते। राजा विविदे। बालकः वेत्स्यते।

There are very small number of आत्मनेपद roots in the 7th conjugation. So we give उभयपद roots

7th conjugation उभयपदी roots

क्षुद् = (to powder) क्षुणत्ति, क्षुन्ते। चुक्षोद, चुक्षुदे। क्षोत्स्यति–ते।

छिद् = (to split) छिनत्ति, छिन्ते। चिच्छेद, चिच्छिदे। छेत्ता। छेत्स्यति–ते।

तृद् = (to kill, to dishonour) तृणत्ति, तृन्ते। ततर्द, ततृदे। तर्दिता। तर्दिष्यति–ते।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

भिद् = (to split) भिनत्ति, भिन्ते । बिभेद, बिभिदे । भेत्ता । भेत्स्यति-ते ।

भुज् = (to eat, to enjoy) भुनक्ति, भुङ्क्ते । बुभोज; बुभुजे । भोक्ता । भोक्ष्यति-ते ।

युज् = (to unite) युनक्ति, युङ्क्ते । युयोज, युयुजे । योक्ता । योक्ष्यति-ते ।

रिच् = (to empty) रिणक्ति, रिङ्क्ते । रिरेच, रिरिचे । रेक्ता । रेक्ष्यति-ते ।

रुध् = (to put stop to) रुणद्धि, रुन्धे । ररोध, ररुधे । रोद्धा । रोत्स्यति-ते ।

विच् = (to separate) विनक्ति, विङ्क्ते । विवेच; विविचे । वेक्ता । वेक्ष्यति-ते ।

धातुओंके रूप

'युज्' = (to unite)

१ लट्

(परस्मै०) = १ युनक्ति, युङ्क्तः, युञ्जन्ति ।
२ युनक्षि, युङ्क्थः, युङ्क्थ ।
३ युनज्मि, युञ्ज्वः, युञ्ज्मः ॥

(आत्मने०) = १ युङ्क्ते, युञ्जाते, युञ्जते ।
२ युङ्क्षे, युञ्जाथे, युङ्ग्ध्वे ।
३ युञ्जे, युञ्ज्वहे, युञ्ज्महे ॥

२ लोट्

(परस्मै०) = १ युनक्तु, युङ्क्ताम्, युञ्जन्तु ।
२ युङ्ग्धि, युङ्क्तम्, युङ्क्त ।
३ युनजानि, युनजाव, युनजाम ॥

(आत्मने०) = १ युङ्क्ताम्, युञ्जाताम्, युञ्जताम् ।
२ युङ्क्ष्व, युञ्जाथाम्, युङ्ग्ध्वम् ।
३ युनजै, युनजावहै, युनजामहै ॥

Sri Vidyabharati Foundation, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

(३) लङ्

(परस्मै०) = १ अयुनक्, अयुङ्क्षताम्, अयुञ्जन् ।
२ अयुनक्, अयुङ्क्तम्, अयुङ्क्त ।
३ अयुनजम्, अयुञ्ज्व, अयुञ्ज्म ॥

(आत्मने०) = १ अयुङ्क्त, अयुञ्जाताम्, अयुञ्जत ।
२ अयुङ्क्थाः, अयुञ्जाथाम्, अयुङ्ढ्वम् ।
३ अयुञ्जि, अयुञ्ज्वहि, अयुञ्ज्महि ॥

(४) विधिलिङ्

(परस्मै०) = १ युञ्ज्यात्, युञ्ज्याताम्, युञ्ज्युः ।
२ युञ्ज्याः, युञ्ज्यातम, युञ्ज्यात ।
३ युञ्ज्याम्, युञ्ज्याव, युञ्ज्याम ॥

(आत्मने०) = १ युंजीत, युंजीयाताम्, युंजीरन् ।
२ युंजीथाः, युंजीयाथाम्, युंजीध्वम् ।
३ युंजीय, युंजीवहि, युंजीमहि ॥

संस्कृत–वाक्यानि

१ त्वं शुंठीं क्षुणत्सि किम् ? अहं शुंठीं न क्षुणद्मि परंतु धान्यं क्षुणद्मि ।

२ कः वृक्षस्य शाखां छिनत्ति ? किमर्थं स एवं वृक्षान् छिनत्ति ? कः श्वः छेत्स्यते ?

३ सर्वे पुरुषाः तत्र अन्नं भुंजन्ति । स्त्रियः कुत्र अन्नं भुंजते ? बालकाः कदा अन्नं अभुक्षत ?

४ स तत्र जलं रुणद्धि । गोपाः सर्वानपि पशून् रुन्धन्ति । मार्गे सैनिकान् कः रोत्स्यति ?

५ योगी स्वकीयं मनः परमात्मनि युनक्ति । सः मनः विवक्षया युङ्क्ते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Lesson– 7

(Mahabharat Udyogaparva ch. 38)

अमोघक्रोधहर्षस्य स्वयं कृत्वाऽन्ववेक्षिणः ।
आत्मप्रत्ययकोशस्य वसुधैव वसुंधरा ॥ २६ ॥
नाममात्रेण तुष्येत च्छत्रेण च महीपतिः ।
भृत्येभ्यो विसृजेदर्थान्नैकः सर्वहरो भवेत् ॥ २७ ॥
ब्राह्मणं ब्राह्मणो वेद भर्ता वेद स्त्रियं तथा ।
अमात्यं नृपतिर्वेद राजा राजानमेव च ॥ २८ ॥
न शत्रुर्वशमापन्नो मोक्तव्यो वध्यतां गतः ।
न्यग्भूत्वा पर्युपासीत वध्यं हन्याद् बले सति ।
अहताद्धि भयं तस्माज्जायते न चिरादिव । ॥ २९ ॥
दैवतेषु प्रयत्नेन राजसु ब्राह्मणेषु च ।
नियंतव्यः सदा क्रोधो वृद्धाबालातुरेषु च ॥ ३० ॥

अमोघक्रोधहर्षस्य अव्यर्थक्रोधहर्षस्य यस्य क्रोधः हर्षश्च न व्यर्थः तस्य, स्वयं कर्म कृत्वा अन्ववेक्षिणः अन्वीक्षणं कुर्वतः निरीक्षणं कुर्वतः आत्मप्रत्ययः कोशस्य स्वकीयकोशस्य प्रत्यक्षं कुर्वतः वसुंधरा वसुदा धनदा नित्यं भवति ॥ २६ ॥ नाममात्रेण छत्रेण च महीपतिः तुष्येत । भृत्येभ्यः अर्थान् धनानि विसृजेत् वधात् । एक एव सर्वहरः सर्वधनहारकः न भवेत् ॥ २७ ॥ ब्राह्मणः ब्राह्मणं वेद जानाति, तथा भर्ता पतिः स्त्रियं धर्मपत्नीं वेद, नृपतिः राजा अमात्यं मंत्रिणं वेद, तथा राजा अन्यं राजानं वेद ॥ २८ ॥ शत्रुः यदि वशं आपन्नः प्राप्तः बध्यतां च गतः स कदापि न मोक्तव्यः । तं वध्यं शत्रुं बले सति स्वकीये बले सति हन्यात् एव अन्यथा स न्यक भूत्वा पुनः अभिमुखो भूत्वा पर्युपासीत् आक्रमणं करिष्यति अतः अवश्यमेव वशगतः शत्रुः हन्तव्यः । हि अहतात् तस्मात् शत्रोः न चिरात् शीघ्रमेव भयं जायते ॥ २९ ॥ प्रयत्नेन दैवतेषु राजसु ब्राह्मणेषु च वृद्धबालातुरेषु स्थविर-बालकरोगिषु च क्रोधः सदा नियंतव्यः न कर्तव्यः ॥ ३० ॥

CC-O. Jangamwadi Math Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

निरर्थं कलहं प्राज्ञो वर्जयेन्मूढसेवितम् ।
कीर्तिं च लभते लोके न चानर्थेन युज्यते ॥ ३१ ॥
प्रसादो निष्फलो यस्य क्रोधश्चापि निरर्थकः ।
न तं भर्तारमिच्छन्ति षण्ढं पतिमिव स्त्रियः ॥ ३२ ॥
न बुद्धिर्धनलाभाय न जाड्यमसमृद्धये ।
लोकपर्यायवृत्तान्तं प्राज्ञो जानाति नेतरः ॥ ३३ ॥
विद्याशीलवयोवृद्धान् बुद्धिवृद्धांश्च भारत ।
धनाभिजातवृत्ताढ्यांश्च नित्यं मूढोऽवमन्यते ॥ ३४ ॥
अनार्यवृत्तमप्राज्ञमसूयकमधार्मिकम् ।
अनर्थाः क्षिप्रमायान्ति वाग्दुष्टं क्रोधनं तथा ॥ ३५ ॥
अविसंवादनं दानं समयस्याऽव्यतिक्रमः ।
आवर्तयन्ति भूतानि सम्यक्प्रणिहिता च वाक् ॥ ३६ ॥

मूढसेवितं मूर्खप्रयुक्तं निरर्थं अर्थहीनं कलहं प्राज्ञः ज्ञानी वर्जयेत् । तेन लोके कीर्तिं लभते, अनर्थेन च न युज्यते अर्थेन लाभेन च युक्तो भवति ॥३१॥ यस्य प्रसादः संतोषः निष्फलः फलरहितः, क्रोधः, च अपि निरर्थकः तं भर्तारं राजानं प्रजाः न इच्छन्ति यथा स्त्रियः षण्ढं पतिं न इच्छन्ति ॥ ३२ ॥ केवलं बुद्धिः ज्ञानं धनलाभाय एव सदा न भवति, तथा जाड्यं जडता बुद्धिहीनत्वं असमृद्धये धननाशाय एव सदा न भवति । लोकपर्यायवृत्तान्तं लोकपरलोकव्यवस्थां प्राज्ञः ज्ञानी एव जानाति न इतरः अज्ञः ॥ ३३ ॥ विद्याशीलवयोवृद्धान् विद्यावृद्धान्, शीलवृद्धान्, वयोवृद्धान्, बुद्धिवृद्धान् च धनाभिजात-वृद्धान्, धनवृद्धान्, अभिजातवृद्धान्, कुलवृद्धान्, हे भारत ! मूढः एव नित्यं अवमन्यते न प्राज्ञः कदापि एतान् अवमन्यते ॥ ३४ ॥ अनार्यवृत्तं अनार्यवत् दुष्टकर्मकर्तारं अप्राज्ञं प्रज्ञाहीनं, असूयकं निन्दकं, अधार्मिकं, वाग्दुष्टं दुष्टभाषणकर्तारं, तथा क्रोधनं अनर्थाः क्षिप्रं आयान्ति ॥३५ अविसंवादनं, अविवादः, दानं, समयस्य कालस्य च अव्यतिक्रमः, सम्यक् प्रणिहिता प्रयुक्ता च वाक् एतानि कृत्यानि भूतानि आवर्तयन्ति समीपं कुर्वन्ति ॥ ३६ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अविसंवादको दक्षः कृतज्ञो मतिमानृजुः ।
अपि संक्षीणकोशोऽपि लभते परिवारणम् ॥ ३७ ॥
धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा ।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः ॥ ३८ ॥
असंविभागी दुष्टात्मा कृतघ्नो निरपत्रपः ।
तादृङ् नराधिपो लोके वर्जनीयो नराधिप ॥ ३९ ॥
न च रात्रौ सुखं शेते ससर्प इव वेश्मनि ।
यः कोपयति निर्दोषं स दोषोऽभ्यंतरं जनम् ॥ ४० ॥
येषु दुष्टेषु दोषः स्याद्योगक्षेमस्य भारत ।
सदा प्रसादनं तेषां देवतानामिवाचरेत् ॥ ४१ ॥
येऽर्थाः स्त्रीषु समायुक्ताः प्रमत्तपतितेषु च ।
ये चानार्यैः समासक्ताः सर्वे ते संशयं गताः ॥ ४२ ॥

अविसंवादकः विवादस्य अकर्ता, दक्षः कृतज्ञः, मतिमान्, ऋजुः सरलः एवंविधः राजा यदि अपि संक्षीणकोशो धनहीनः भवति तथापि परिवारणं भृत्यादिपरिवारं लभते प्राप्नोति ॥ ३७ ॥ धृतिः धैर्यं शमः, दमः शौचं, कारुण्यं करुणा दया, अनिष्ठुरा मधुरा वाक्, मित्राणां च अनभिद्रोहः अद्रोहः एताः सप्त श्रियः ऐश्वर्यस्य समिधः सन्ति ॥ ३८ ॥ हे नराधिप ! असंविभागी धनस्य अदाता, दुष्टात्मा, कृतघ्नः, निरपत्रपः निर्लज्जः, तादृक् एवंविधः नराधिपः लोके वर्जनीयः ॥ ३९ ॥ स रात्रौ सुखं न शेते, ससर्पे सर्पयुक्ते वेश्मनि गृहे इव। यः निर्दोषं कोपयति स दोषो अभ्यंतरं जनं अपि नाशयति ॥ ४० ॥ हे भारत ! येषु दुष्टेषु दोषयुक्तेषु योगक्षेमस्य योगक्षेमसंबंधी दोषः स्यात् देवतानां इव तेषां सदा प्रसादनं प्रसन्नत्वं आचरेत् ॥ ४१ ॥ ये अर्थाः स्त्रीषु समायुक्ताः ये प्रमत्तपतितेषु च समासक्ताः, ये च अनार्ये अनार्येण सह समासक्ताः, ते सर्वे अर्थाः संशयं गताः, तेषां सिद्धिर्नैव भविष्यति ॥ ४२ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

समासाः

१ अविसंवादकः = विशेषण संवादकः विसंवादकः । न विसंवादकः अविसंवादकः ।
२ कृतज्ञः = कृतं जानाति इति कृतज्ञः ।
३ संक्षीणकोशः = सम्यक् क्षीणः संक्षीणः । संक्षीणः कोशः यस्य सः संक्षीणकोशः ।
४ अनिष्ठुरः = न निष्ठुरः ।
५ नराधिपः = नराणां अधिपः ।
६ दुष्टात्मा = दुष्टः आत्मा यस्य ।
७ कृतघ्नः = कृतं हन्ति इति कृतघ्नः ।
८ निरपत्रपः = निर्गता अपत्रपा लज्जा यस्मात् ।

Lesson– 8

Root of the 8th conjugation

The 8th conjugational roots have 'उ' as their विकरण, and this is added between to root and the tense suffik, For example—

क्षिण् + उ + ति = क्षिणोति (परस्मैपद)
क्षिण् + उ + ते = क्षिणुते (आत्मनेपद)

There are as परस्मैपद roots exclusively in the 8th conjugation and आत्मनेपद roots are very small in number. The उभयपद roots also are very little in number. So we give here only उभयपद roots.

'तन्' = (to spread) उभयपदी root ।

(१) लट्

(परस्मै०) = १ तनोति, तनुतः, तन्वन्ति ।
२ तनोषि, तनुथः, तनुथ ।
३ तनोमि, तनुवः, (तन्वः) तनुमः, (तन्मः) ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

(आत्मने०) = १ तनुते, तन्वाते, तन्वते ।
२ तनुषे, तन्वाथे, तनुध्वे ।
३ तन्वे, तनुवहे, (तन्वहे), तनुमहे (तन्महे) ॥

(२) लोट्

(परस्मै०) = १ तनोतु, तनुताम्, तन्वन्तु ।
२ तनु, तनुतम्, तनुत ।
३ तनवानि, तनवाव, तनवाम ॥
(आत्मने०) = १ तनुताम्, तन्वाताम्, तन्वताम् ।
२ तनुष्व, तन्वाथाम्, तनुध्वम् ।
३ तनवै, तनवावहै, तनवामहै ॥

(३) लङ्

(परस्मै०) = १ अतनोत्, अतनुताम्, अतन्वन् ।
२ अतनोः, अतनुतम्, अतनुत ।
३ अतनवम्, अतनुव (अतन्व), अतनुम (अतन्म) ॥
(आत्मने०) = १ अतनुत, अतन्वाताम्, अतन्वत ।
२ अतनुथाः, अतन्वाथाम्, अतनुध्वम् ।
३ अतन्वि, अतनुवहि (अतन्वहि), अतनुमहि (अतन्महि) ॥

(४) विधिलिङ्

(परस्मै०) = १ तनुयात्, तनुयाताम्, तनुयुः ।
२ तनुयाः, तनुयाताम्, तनुयात ।
३ तनुयाम्, तनुयाव, तनुयाम ॥
(आत्मने०) = १ तन्वीत, तन्वीयाताम्, तन्वीरन् ।
२ तन्वीथाः, तन्वीयाथाम्, तन्वीध्वम् ।
३ तन्वीय, तन्वीवहि, तन्वीमहि ॥

This way the forms of the other roots can be framed. There are two forms each in some of the numbers; and this fact might have come to the notice of the students. Now we give the उभयपद roots of the 8th conjugation.

Sri Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

8th conjugation उभयपदी Roots

ऋण् = (to go, to gain) ऋणोति, ऋणुते । आनर्ण, आनृणे । अर्णिता । अर्णिष्यति-ते ।

कृ = (to do) करोति, कुरुते । चकार, चक्रे । कर्ता । करिष्यति ।

क्षिण् = (to kill) क्षिणोति, क्षिणुते । चिक्षेण, चिक्षिणे । क्षेणिता । क्षेणिष्यति-ते ।

तन् = (to spread) तनोति, तनुते । ततान, तेने । तनिता । तनिष्यति-ते ।

तृण् = (to eat) तृणोति, तृणुते । ततर्ण । तर्णिता । तर्णिष्यति-ते ।

सन् = (to give) सनोति, सनुते । ससान, सेने । सनिता । सनिष्यति-ते ।

संस्कृत-वाक्यानि

१ स यज्ञं तनुते । घर्माध्यक्षौ घर्मं तन्वाते । बालकाः उपवने क्रीडां तन्वन्ति ।

२ अहं पठनं करोमि । त्वं किं करोषि ? सः करोतु । त्वं कुरु । सः मा करोतु ।

३ सिंहः वने हस्तिनः क्षिणोति । त्वं किमर्थं क्षिणोषि ? बालः क्षिणोतु परंतु प्राज्ञः मा क्षिणोतु ।

This way the sentences can be formed. Now see आत्मनेपद roots.

8th conjugation आत्मनेपदी Roots

मन् = (to know, to consider) मनुते । मेने । मनिता । मनिष्यते ।

वन् = (to request) वनुते । ववने । वनिता । वनिष्यते ।

१ लट् = १ मनुते, मन्वाते, मन्वते । २ मनुषे, मन्वाथे, मनुध्वे । ३ मन्वे, मनुवहे, मनुमहे ॥

२ लोट् = १ मनुताम्, मन्वाताम्, मन्वताम् । २ मनुष्व, मन्वाथाम्, मनुध्वम् । ३ मनवै, मनवावहै, मनवामहै ॥

३ लङ् = १ अमनुत, अमन्वाताम्, अमन्वत । २ अमनुथाः, अमन्वाथाम्, अमनुध्वम् । ३ अमन्वि, अमनुवहि, अमनुमहि ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

४ विधिलिङ् = १ मन्वीत, मन्वीयाताम्, मन्वीरन् । २ मन्वीथाः मन्वीयाथाम्, मन्वीध्वम् । ३ मन्वीय, मन्वीवहि, मन्वीमहि ॥

This way the forms of 'वन्' also are framed and may be used in sentences.

संस्कृत–वाक्यानि

१ वयं सर्वेऽपि मानवाः मनुमहे । मूढः मनुष्यः अपि मनुते, प्राज्ञस्तु मनुत एव ।

२ याचकः अन्नं मनुते । कः एवं अवनुत ? स भिक्षुः वनताम्, परंतु त्वं मा वनुष्व ।

Lesson– 9

9th conjugational Roots

9th conjugation विकरण

The 9th conjugation has 'ना' as its sign and as usual is placed before the tense suffix.

अश् + ना + ति = अश्नाति ।
पुष् + ना + ति = पुष्णाति ।
स्तभ् + ना + ति = स्तभ्नाति ।

This way the forms are framed and they are very easily done.

'बंध्' = (to tie.)

१ लट् = १ बध्नाति, बध्नीतः, बध्नन्ति । २ बध्नासि, बध्नीथः, बध्नीथ । ३ बध्नामि, बध्नीवः, बध्नीमः ॥

२ लोट् = १ बध्नातु, बध्नीताम्, बध्नन्तु । २ बधान, बध्नीतम्, बध्नीत । ३ बध्नानि, बध्नाव, बध्नाम ॥

३ लङ् = १ अबध्नात्, अबध्नीताम्, अबध्नन् । २ अबध्नाः, अबध्नीतम्, अबध्नीत । ३ अबध्नाम्, अबध्नीव, अबध्नीम ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

४ विधिलिङ् = १ बध्नीयात्, बध्नीयाताम्, बध्नीयुः। २ बध्नीयाः, बध्नीयातम्, बध्नीयात्। ३ बध्नीयाम्, बध्नीयाव, बध्नीयाम ॥

This way, the following forms of the 9th conjugation परस्मैपद roots are framed.

9th conjugation परस्मैपद् roots.

अश् = (to eat) अश्नाति। अशान। अशिता। अशिष्यति।

ऋ = (to go, to gain) ऋणाति। आरांचकार। अरिता। अरिष्यति।

कुंथ् = (to be grieved) कुन्थ्नाति। चुकुन्थ। कुंथिता। कुंथिष्यति।

क्लिश् = (to suffer sorrow) क्लिश्नाति। चिक्लेश। क्लेशिता, क्लेष्टा। क्लेशिष्यति।

क्षुभ् = (to upheave) क्षुभ्नाति। चुक्षोभ। क्षोभिता। क्षोभिष्यति।

गृ = (to make noise) गृणाति। जगार। गरिता। गरिष्यति।

ग्रन्थ् = (to join) ग्रथ्नाति। जग्रन्थ। ग्रंथिता। ग्रंथिष्यति।

जॄ = (to grow old) जृणाति। जजार। जरिता, जरीता। जरिष्यति, जरीष्यति।

दृ = (to tear) दृणाति। ददार। दरिता। दरिष्यति।

नभ् = (to kill) नभ्नाति। ननाम। नभिता। नभिष्यति।

नॄ = (to take) नृणाति। ननार। नरिता। नरिष्यति।

पुष् = (to become strong) पुष्णाति। पुपोष। पोष्टा। पोक्ष्यति।

पॄ = (to protect) पृणाति। पपार। परिता। परिष्यति।

बन्ध् = (to tie) बध्नाति। बबन्ध। बन्द्धा। भन्त्स्यति।

भॄ = (to blame, to protect) भृणाति। बभार। भरिता। भरिष्यति।

मन्थ् = (to churn) मथ्नाति। ममन्थ। मन्थिता। मन्थिष्यति।

मुष् = (to steal) मुष्णाति। मुमोष। मोषिता। मोषिष्यति।

मृद् = (to press, to rub) मृद्नाति। ममर्द। मर्दिता। मर्दिष्यति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मृ = (to kill) मृणाति । ममार । मरिता । मरिष्यति ।

शृ = (to kill) शृणाति । शशार । शरिता । शरिष्यति ।

ग्रन्थ् = (to loosen, to be happy) ग्रथ्नाति । ग्रग्रन्थ । ग्रन्थिता । ग्रन्थिष्यति ।

स्तभ्भ् = (to wear, to support) स्तभ्नाति । तस्तम्भ । स्तम्भिता । स्तम्भिष्यति ।

संस्कृत–वाक्यानि

१ जनाः मधुरं अन्नं अश्नन्ति । सर्वे प्राणिनः अन्नं अश्नन्तु । बालकाः प्रथमं अश्नन्तु ।

२ भृत्यः तत्र किमर्थं क्लिश्नाति ? शिष्यः मा क्लिश्नातु । स्त्रियः न क्लिश्नीयुः ।

३ मालाकारः पुष्पाणां मालाः ग्रथ्नाति । त्वं किं ग्रथ्नासि ? यदा स ग्रथ्नाति तदा त्वमपि ग्रथान ।

४ दुग्धेन बालः पुष्णाति । त्वं केन अन्नेन पुष्णासि ? सर्वे मनुष्याः पुष्णन्तु ।

५ चौराः गृहं भित्त्वा धनं मुष्णन्ति । कः अपि मनुष्यः कदापि कस्यापि धनं मा मुष्णातु ।

६ वायुः मेघे उदकं स्तभ्नाति । हिमकालः तडागे उदकं स्तभ्नाति । त्वं नदीजलं स्तभान ।

संधि किये हुए वाक्य

(१) जना मधुरमन्नमश्नन्ति । सर्वे प्राणिनोऽन्नमश्नन्तु । बालकाः प्रथममश्नन्तु । (२) भृत्यस्तत्र किमर्थं क्लिश्नाति ? शिष्यो मा क्लिश्नातु । स्त्रियो न क्लिश्नीयुः (३) मालाकारः पुष्पाणां माला ग्रथ्नाति । (४) बालो दुग्धेन पुष्णाति । त्वं केनान्नेन पुष्णासि ? (५) कोऽपि मनुष्यः कदापि कस्यापि धनं मा मुष्णातु ।

CC-O. Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Lesson– 10

9th conjugation आत्मनेपदी root

वृ = (to serve well, to choose) वृणीते। वव्रे। वरिता। वरिष्यति।

आत्मनेपद

१ लट् = १ वृणीते, वृणाते, वृणते। २ वृणीषे, वृणाथे, वृणीध्वे। ३ वृणे, वृणीवहे, वृणीमहे॥

२ लोट् = १ वृणीताम्, वृणाताम्, वृणताम्। २ वृणीष्व, वृणाथाम्, वृणीध्वम्। ३ वृणै, वृणावहै, वृणामहै॥

३ लङ् = १ अवृणीत, अवृणीताम्, अवृणत। २ अवृणीथाः, अवृणीथाम्, अवृणीध्वम्। ३ अवृणि, अवृणीवहि, अवृणीमहि॥

४ विधिलिङ् = १ वृणीत, वृणीयाताम्, वृणीरन्। २ वृणीथाः, वृणीयाथाम्, वृणीध्वम्। ३ वृणीय, वृणीवहि, वृणीमहि॥

संस्कृत–वाक्यानि

१ पुरुषः विद्यां अधीत्य, ब्रह्मचर्यं समाप्य, गृहाश्रमाय स्त्रियं वृणीते धर्मेण विधिना।

२ हे शिष्य! त्वं इदानीं विद्याव्रतस्नातकोऽसि अतः अनुरूपां स्त्रियं वृणीष्व।

३ सर्वाः प्रजाः राज्यशासनाय सुयोग्यं राजानं वृणते।

9th conjugation उभयपदी roots

क्रु = (to kill) क्रुणाति, क्रुणीते।

क्री = (to purchase) क्रीणाति, क्रीणीते। चिक्राय, चिक्रिये। क्रेता। क्रेष्यति–ते।

ग्रह् = (to receive) गृह्णाति, गृह्णीते। जग्राह, जगृहे। ग्रहीता। ग्रहीष्यति–ते।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ज्ञा = (to know) जानाति, जानीते। जज्ञौ, जज्ञे। ज्ञाता। ज्ञास्यति-ते।

धू = (to shake) धुनाति, धुनीते। दुधाव, दुधुवे। धोता, धविता। धोष्यति-ते।

पू = (to purify) पुनाति, पुनीते। पुपाव, पुपुवे। पविता। पविष्यति-ते।

प्री = (to be satisfied) प्रीणाति, प्रीणीते। पिप्राय, पिप्रिये। प्रेता। प्रेष्यति-ते।

मी = (to kill) मीनाति, मीनीते। ममौ, मिम्ये। माता। मास्यति-ते।

यु = (to join, to tie) युनाति, युनीते। युयाव, युयुवे। योता। योष्यति-ते।

लू = (to bite, to cut) लुनाति, लुनीते। लुलाव, लुलुवे। लविता। लविष्यति-ते।

वृ = (to choose, वृणाति, वृणीते। ववार, वव्रे। वरिता। वरिष्यति-ते।

श्री = (to cook) श्रीणाति, श्रीणीते। शिश्राय, शिश्रिते। श्रेता। श्रेष्यति-ते।

सि = (to tie) सिनाति, सिनीते। सिषाय, सिष्ये। सेता। सेष्यति-ते।

स्तृ = (to cover) स्तृणाति, स्तृणीते। तस्तार, तस्तरे। स्तरिता। स्तरिष्यति-ते।

Forms of उभयपद roots

(१) लट्

(परस्मै०) = १ क्रीणाति, क्रीणीतः, क्रीणन्ति।
२ क्रीणासि, क्रीणीथः, क्रीणीथ।
३ क्रीणामि, क्रीणीवः, क्रीणीमः॥

(आत्मने०) = १ क्रीणीते, क्रीणाते, क्रीणते।
२ क्रीणीषे, क्रीणाथे, क्रीणीध्वे॥
३ क्रीणे, क्रीणीवहे, क्रीणीमहे॥

Sri Vidyabharathi Book Centre, Shimoga

CC-O. In Public Domain. Digitized by eGangotri

(२) लोट्

(परस्मै०) = १ क्रीणातु, क्रीणीताम्, क्रीणन्तु ।
२ क्रीणीहि, क्रीणीतम्, क्रीणीत ।
३ क्रीणानि, क्रीणाव, क्रीणाम ॥

(आत्मने०) = १ क्रीणीताम्, क्रीणाताम्, क्रीणताम् ।
२ क्रीणीष्व, क्रीणाथाम्, क्रीणीध्वम् ।
३ क्रीणै, क्रीणावहै, क्रीणामहै ॥

(३) लङ्

(परस्मै०) = १ अक्रीणात्, अक्रीणीताम्, अक्रीणन् ।
२ अक्रीणाः, अक्रीणीतम्, अक्रीणीत ।
३ अक्रीणम्, अक्रीणीव, अक्रीणीम ॥

(आत्मने०) = १ अक्रीणीत, अक्रीणीताम्, अक्रीणीत ।
२ अक्रीणीथाः, अक्रीणाथाम्, अक्रीणीध्वम
३ अक्रीणि, अक्रीणीवहि, अक्रीणीमहि ॥

(४) विधिलिङ्

(परस्मै०) = १ क्रीणीयात्, क्रीणीयाताम्, क्रीणीयुः ।
२ क्रीणीयाः, क्रीणीयाताम्, क्रीणीयात ।
३ क्रीणीयाम्, क्रीणीयाव, क्रीणीयाम ॥

(आत्मने०) = १ क्रीणीत, क्रीणीयाताम्, क्रीणीरन् ।
२ क्रीणीथाः, क्रीणीयाथाम्, क्रीणीध्वम् ।
३ क्रीणीय, क्रीणीवहि, क्रीणीमहि ॥

संस्कृत–वाक्यानि

१ अहं धान्यं क्रीणामि, त्वं किं क्रीणीषे ? त्वं किं श्वः क्रेष्यसि ? न ह्यहं घृतं अक्रीणम् ।

२ अहं जानामि, त्वं जानासि, स जानातु । अहं अजानम्, यत् त्वं तत्र पुस्तकं अपठः ।

३ अहं ते सौभगत्वाय हस्तं गृह्णामि । ते अन्नं गृह्णन्तु । त्वं किं ग्रहीष्यसि ?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

४ वायुः चंपकवनानि धुनाति । त्वं वस्त्रं किं न धोष्यसि ? ते सर्वे काष्ठानि धुनन्ति ।

५ स तां भूमिं जलेन पुनाति । त्वं वस्त्रं किं पुनासि ? स मंत्रैः कर्णौ पुनीते । महात्मा आशीर्वादैः सर्वान् पुनातु ।

The students can easily form such sentences.

Note

We have so far considered all the verbal roots. In the next para we are going to show how these roots can be formed into verbs (with svffixes of tenses) easily and the students should learn them well and be benefitted thereby,

समासः

१ चंपकवनं = चंपकानां वनम् ।
२ सौभगत्वं = सौभगस्य भावः ।

Lesson– 11

(Mahabharat Udyogaparva ch. 39)

धृतराष्ट्र उवाच ।

सर्वं त्वमायतीयुक्तं भाषसे प्राज्ञसंमतम् ।
न चोत्सहे सुतं त्यक्तुं यतो धर्मस्ततो जयः ॥ ९ ॥

विदुर उवाच ।

अतीव गुणसंपन्नो न जातु विनयान्वितः ।
सुसूक्ष्ममपि भूतानामुपमर्दमपेक्षते ॥ १० ॥

धृतराष्ट्र उवाच— त्वं सर्वं प्राज्ञसंमतं सूत्रसंमतं आयतीयुक्तं हितकरं भाषसे, तथापि सुतं पुत्रं त्यक्तुं तु उत्सहे उत्साहं न धारयामि । अतः सत्यमेव एतत्, यतः धर्मः ततो जयः ॥ ९ ॥ विदुरः उवाच— यः अतीव गुणसंपन्नः गुणैः पूर्णः तथा विनयान्वितश्च भवति सः भूतानां प्राणिनां सुसूक्ष्मं अत्यल्पमपि उपमर्दं नाशं न अपेक्षते इच्छति ॥ १० ॥

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

परापवादनिरताः परदुःखोदयेषु च ।
परस्परविरोधे च यतन्ते सततोत्थिताः ॥ ११ ॥
सदोषं दर्शनं येषां संवासे सुमहद्भयम् ।
अर्थादाने महान्दोषः प्रदाने च महद्भयम् ॥ १२ ॥
ये वै भेदनशीलास्तु सकामा निस्त्रपाः शठाः ।
ये पापा इति विख्याताः संवासे परिगर्हिताः ॥ १३ ॥
युक्तश्चान्यैर्महादोषैर्यै नरास्तान्विवर्जयेत् ।
निवर्तमाने सौहार्दे प्रीतिर्नीचे प्रणश्यति ॥ १४ ॥
या चैव फलनिर्वृत्तिः सौहृदे चैव यत्सुखम् ।
यतते चापवादाय यत्नमारभते क्षये ॥ १५ ॥
अल्पेऽप्यपकृते मोहान्न शांतिमधिगच्छति ।
तादृशैः संगतं नीचैर्नृशंसैरकृतात्मभिः ॥ १६ ॥

परापवादनिरताः परनिंदारताः दुष्टाः सततोत्थिताः सततजागरूकाः भूत्वा परस्परविरोधे परस्परकलहे यतन्ते प्रयतन्ते तथा च परदुःखोदयेषु कर्मसु च प्रयतन्ते ॥ ११ ॥ येषां दर्शनं सदोषं दोषयुक्तं, येषां संवासे च महद्भयं वर्तते, येषां अर्थादाने अनुग्रहणे महान् दोषः, येषां धनस्य प्रदाने च महद्भयं वर्तते ते महादुष्टाः सन्ति ॥ १२ ॥ ये वै शठाः खलाः, निस्त्रपाः निर्लज्जाः सकामाः कामेन सहिताः, तथा भेदनशीलाः विरोधकारकस्वभावाः, ये च पापा इति विख्याताः ते संवासे सहवासे परिगर्हिताः निंदिताः सन्ति । तैः सह मैत्री कदापि न कर्तव्या ॥ १३ ॥ ये अन्यैः महादोषैः युक्ताः तान् नरान् सौहृदवर्धे विवर्जयेत् । सौहार्दे निवर्तमाने नाशमाने नीचे जने प्रीतिः प्रणश्यति ॥ १४ ॥ या च एव फलनिर्वृत्तिः सौहृदे मित्रत्वे च एव यत्सुखं वर्तते, तत्तु नीचसंगत्या नैव प्राप्नोति । यः अपवादाय निंदाकरणार्थं एव यतते यत्नवान् भवति क्षये नाशाय एव यत्नं आरभते ॥ १५ ॥ यः च अल्पे अपि अपकृते अपकारे कृते मोहात् कदापि शांतिं न अधिगच्छति प्राप्नोति, तादृशैः नीचैः नृशंसैः दुष्टैः अकृतात्मभिः हीनात्मभिः सह संगतं मित्रत्वम् ॥ १६ ॥

× Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

निशम्य निपुणं बुद्ध्या निद्वान्दूराद्विवर्जयेत् ।
यो ज्ञातिमनुगृह्णाति दरिद्रं दीनमातुरम् ॥ १७ ॥

स पुत्रपशुभिर्वृद्धिं श्रेयश्चानन्त्यमश्नुते ।
ज्ञातयो वर्धनीयास्तैर्य इच्छन्त्यात्मनः शुभम् ॥ १८ ॥

कुलवृद्धिं च राजेन्द्र तस्मात्साधु समाचर ।
श्रेयसा योक्ष्यते राजन् कुर्वाणो ज्ञातिसत्क्रियाम् ॥ १९ ॥

विगुणा ह्यपि संरक्ष्या ज्ञातयो भरतर्षभ ।
किं पुनर्गुणवन्तस्ते त्वत्प्रसादाभिकांक्षिणः ॥ २० ॥

प्रसादं कुरु वीराणां पाण्डवानां विशांपते ।
दीयतां ग्रामकाः केचित्तेषां वृत्त्यर्थमीश्वर ॥ २१ ॥

एवं लोके यशः प्राप्तं भविष्यति नराधिप ।
वृद्धेन हि त्वया कार्यं पुत्राणां तात शासनम् ॥ २२ ॥

बुद्ध्या विचारशक्त्या निपुणं निशम्य पूर्णं विचार्य विद्वान् पुरुषाः दूरात् विवर्जयेत् । तैः दुष्टैः सह मैत्री न कर्तव्या । यः दरिद्रं, दीनं, आतुरं रोगिणं ज्ञातिं अनुगृह्णाति ॥ १७ ॥ स पुत्रपशुभिर्वृद्धिं श्रेयः कल्याणस्य आनन्त्यं अनंतत्वं च अश्नुते प्राप्नोति य आत्मनः शुभं इच्छति, तैः ज्ञातयः वर्धनीयाः संवर्धनीयाः ॥ १८ ॥ यः कुलवृद्धिं च इच्छति तेन अपि तथैव कर्तव्यम् । हे राजेन्द्र राजश्रेष्ठ ! तस्मात् साधु यथा स्यात् तथा समाचर शोभनं आचरणं कुरु । हे राजन् ! ज्ञातिसत्क्रियां कुर्वाणः श्रेयसा योक्ष्यते कल्याणेन युक्तो भवति ॥ १९ ॥ हे भरतर्षभ भरतश्रेष्ठ ! विगुणाः गुणहीना अपि ज्ञातयः स्वजातिपुरुषाः संरक्ष्याः । किं पुनः त्वत्प्रसादाभिकांक्षिणः तव प्रसादं एव इच्छन्तः ते गुणवन्तः ज्ञातयः रक्षणीया इति वक्तव्यम् ? ॥ २० ॥ हे विशांपते प्रजानां पालक ! वीराणां पांडवानां उपरि प्रसादं कुरु । हे ईश्वर ! राजन् ! तेषां वृत्त्यर्थं केचित् ग्रामकाः ग्रामाः दीयन्ताम् ॥ २१ ॥ हे नराधिप ! एवं लोके यशः प्राप्तं भविष्यति ! हे तात ! त्वया वृद्धेन हि पुत्राणां शासनं कार्यम् ॥ २२ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मया चापि हितं वाच्यं विद्धि मां त्वद्धितैषिणम् ।
ज्ञातिभिर्विग्रहस्तात न कर्तव्यः न शुभार्थिना ।
सुखानि सह भोज्यानि ज्ञातिभिः भरतर्षभ ॥ २३ ॥

मया च अपि हितं वाच्यम् । मां त्वद्धितैषिणं तव हितं एव इच्छन्तं मां विद्धि जानीहि । हे तात ! शुभार्थिना शुभ इच्छता पुरुषेण ज्ञातिभिः विग्रहः कलहः न कर्तव्यः । हे भरतर्षभ ! ज्ञातिभिः सह भोज्यानि सह भोजनानि सुखानि सुखकारकानि भवन्ति ॥ २३ ॥

Lesson– 12

रामायणम्

(१)

एवं विलपन्ती सीता तदा वृक्षगतं गृध्रं ददर्श । सा सीता तदा तं गृध्रमुद्दीक्ष्य समाक्रन्दच्च महता शब्देन । 'पश्य माम्, रावणस्य वशं गताऽस्मि, पश्य मां, अनाथवत् ह्रियमाणाम् ।'

जटायुस्तु तं शब्दं श्रुत्वा, दृष्ट्वा च तां राक्षसेन ह्रियमाणां, व्याजहार– 'राक्षसाधम ! नार्हसि निंदितं कर्म कर्तुम् । धीरो नैवं कर्म समाचरेत् येन तं परो बिगर्हयेत् । यथाऽऽत्मनः दारास्तथा परेषामपि रक्षणीया एव । अहं तु वृद्धः । त्वं तु युवा कवची सशस्त्रश्च, किंतु सीतामादाय कुशली नैव गमिष्यसि ।' इति ।

एवमुक्तो रावणो अमर्षणशीलः पतगेन्द्रं गृध्रं जटायुं अभिदुद्राव । वातोद्धूतयोर्मेघयोरिव तयोस्तत्र तुमुलः संग्रहारो बभूव । जटायुस्तु तदा तुण्डेन रावणस्य दश बाहूनतिक्रम्य ते अदशत् । दशग्रीवोऽपि सीतां तत्रोत्सृज्य क्रोधाद् मुष्टिभ्यां चरणाभ्यां गृध्रराजमपोथयत्, खड्गेन तस्य पक्षौ पादौ चाच्छिनत् । तदाऽसौ जटायुः धरण्यां पपात ।

शब्दार्थ— वृक्षगतं = one who sits on tree समाक्रन्दत् = called व्याजहार = said कुशली = skillfully अमर्षणशीलः = harsh अभिदुद्राव = ran तुण्ड = mouth निरीक्ष्य = seeing

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

रावणेन निहतं गृधराजं निरीक्ष्य सीता भृशं विललाप। रावणस्तु तां क्रोशन्तीं केशेषु जग्राह। तदा सर्वं जगत् मंघेन तमसा व्याप्तम्। मत्तगज इव स दशाननस्तमादाय त्वरं प्रस्थितः।

तदा तस्याः शरीरात् पुष्पमाला च्युता धरणीतले पपात। तस्याश्चरणाश्च रत्नभूषितं नूपुरं, कंठाद्धारवलयं च भ्रष्टम्। एवं रावणेन ह्रियमाणायां सीतायां दिवाकरः प्रभारहितो बभूव। एवं रावणः सीतां पतिव्रतां हरति तत्र धर्मः नास्ति, कुतः सत्यं, आर्जवं अपि च न, इति सर्वाण्यपि भूतानि पर्यदेवयन्।

सीता रावणेनैवं ह्रियमाणा पंच वानरश्रेष्ठान् गिरिश्रृंगस्थान् ददर्श। तेषां मध्ये सा कौशेयमुत्तरीयं शुभानि चाभरणानि मुमोच इमे शंसेयू रामायेति। रावणस्तु संभ्रमात्तन्नबुबोध। चापाच्च्युतः शर इव स तामादाय लंकामेव जगाम।

(२)

रामस्तु मारीचं राक्षसं निहत्य पृष्ठतो निवर्तमानः दीनं शून्यं लक्ष्मणं दृष्ट्वा पर्यपृच्छत्। हे लक्ष्मण! कथं वैदेहीं तत्र त्यक्त्वाऽऽगतोऽसि।' इति।

लक्ष्मणोऽपि सर्वं यथावृत्तमकथयत्। तच्छ्रुत्वा रामस्त्वरमाणस्ततः स्थानात् स्वाश्रममागत्य तं शून्यं दृष्ट्वा उद्विग्नमानसो बभूव, बहु विललाप च।

शोकार्णवे निमग्नो रामो वृक्षाद्वृक्षं प्रधावन् नदीनदं गिरींश्च बभ्राम। 'हा सीते! क्व गताऽसि' इति कृत्वा पुनः पुनर्बहु विललाप च। शोकेन विह्वलश्चाभवत्।

लक्ष्मणस्तं प्रश्रितो बहुप्रकारं सान्त्वयामास। तमनादृत्य सोऽपि पुनः पुनः प्राक्रोशत्। 'लक्ष्मण! गच्छाद्यायोध्याम्, मद्वचनाद्भरतो वाच्यः। अनुज्ञातोऽसि रामेण, पालय वसुंधराम्, अम्बाश्च सर्वा अपि रक्षणीया इति।'

शब्दार्थ— आर्जवं = Straight forwardness गिरिश्रृंग = Top of a mountain शंसेयुः = said संभ्रम = confusion अम्बा = mother मत्तगजः = weak गाढ = sick

CC-O. Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

रामस्य महता शोककरणेन च लक्ष्मणोऽपि दीनो व्यथितमनाश्च बभूव। उवाच च रामं— 'हे राम! यदि त्वं काकुत्स्थो भूत्वाऽपि दुःखं न सहिष्यसे तर्हि कः इतरः प्राकृतोऽल्पसत्वः सहिष्यति? कस्योपरि आपदो नागच्छन्ति?'

(३)

इति लक्ष्मणवचनं श्रुत्वा रामश्चेतनां प्राप्तः उवाच च लक्ष्मणं 'भद्रं! चिन्तयेह केनोपायेन सीतां पश्याव इति।'

तौ रामलक्ष्मणौ वनमन्विष्यन्तौ मृतप्रायं भूमौ पतितं तं जटायुं ददृशतुः। तं दृष्ट्वा रामो लक्ष्मणमब्रवीत्। 'अनेनैव सीता भक्षिता भवेत्। एष राक्षस एव भवेत्। एनं वधिष्ये।' इति।

गृध्रस्तु रुधिरं वमन्नुवाच- 'यां देवीं त्वं अन्वेषसि सा देवी रावणेन हृता। मम प्राणा अपि तेनैव हृताः। इदमस्य धनुर्भग्नम्। एते शरास्तस्य। एष भग्नो रथः। भवतः शत्रुः मे पक्षौ छित्वा सीतामादाय इत एव लंकां प्रस्थितः।' इति।

इति तस्य भाषणं श्रुत्वा तं गृध्रं परिष्वज्य सलक्ष्मणो बहु रुरोद। उवाच च- 'राज्यं भ्रष्टं, वने वासः, सीताऽपि रावणेन हृता, त्वं अपि मृतः। इदृशी ममेयं विपत्।'

तदा गृध्रं मृतं दृष्ट्वा रामो लक्ष्मणमब्रवीत्- 'आहर काष्ठानि, दहाव एनमिति।'

एवमुक्त्वा धर्मात्मानौ तं गृध्रशरीरं सीतां चितामारोप्य देहतुः। गोदावरीं नदीं गत्वा तस्मै उदकमपि चक्रतुः।

तदा दक्षिणां दिशं प्रस्थितौ तौ वीरौ रामलक्ष्मणौ किंचिद् दूरं गत्वा तौ कबंधं नाम राक्षसं आसेदतुः। तं खड्गेन हत्वा किंचिद् दूरमग्रे गत्वा शबर्या आश्रमं तौ अपश्यताम्। सा शबर्यपि रामलक्ष्मणौ दृष्ट्वा तयोः पादौ जग्राह।

तस्या आतिथ्यं वन्यफलमूलादिकं गृहीत्वा तत्र कंचित्कालं स्थित्वा रामलक्ष्मणौ अग्रे जग्मतुः। केनचित्त्वथ कालेन तौ पम्पा-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरोवरं प्राप्तौ। पम्पायाः सौन्दर्यं रमणीयतां च दृष्ट्वा रामस्येन्द्रियाणि चकम्पिरे। तत्रत्यां वन्यां शोभां दृष्ट्वा रामः सीताविरहं स्मृत्वा विह्वलोऽभूत्। 'हे लक्ष्मण! सीतया विहीनोऽहं दीनः कथं प्राणान् धारये' इति भृशं रुरोद।

एवं विलपन्तं लक्ष्मणो राममब्रवीत्। 'क एष शोकः? संस्तम्भ राम! सर्वथा न भविष्यति रावणः पातालमपि गच्छन्। स्थानं तावल्लभ्यतां पापस्य। सीतां ततो हास्यति निधनं वा गमिष्यति। आर्यपुत्र! उत्साहं वर्धय। नास्त्युत्साहात्परमं बलम्। सोत्साहस्य हि लोकेषु न किंचिदपि दुर्लभं वर्तते' इति।

एवं लक्ष्मणेन संबोधितो रामस्त्यक्त्वा शोकं धैर्यमुपागमत्। अतिक्रम्य ततः पम्पां ऋष्यमूकपर्वतस्य समीपं रामलक्ष्मणौ प्राप्तौ वानराणां तत्रत्यानां अधिपेन च दृष्टौ।

सुग्रीवस्तु तौ दृष्ट्वा शंकितोऽभवत्। शंकितं च तं वाक्यकोविदो हनुमानुवाच। 'त्यजतामेष संभ्रमः। मलयोऽयं गिरिवरः। नेह भयं वालिनः' इति। सुग्रीवस्तूवाच 'कस्य न स्याद्भयमेतौ पुरुषोत्तमौ दीर्घबाहू वीर्यवन्तौ वीरौ दृष्ट्वा। शंके वालिप्रहितावेवैतौ भवतः। नात्र विश्वासः संशयश्च। जानीहि भद्र। एतौ शुद्धात्मानौ वा अन्यथेति।'

एवं समादिष्टो हनुमान् ऋष्यमूकात्पुप्लुवे यत्र रामलक्ष्मणौ आस्ताम्। हनुमान् भिक्षुरूपेण तत्र गतो विनीतवदुपागम्य प्रणिपत्य च तौ वाक्यमुवाच। 'राजर्षिप्रतिमौ तापसौ कथं प्राप्तौ असुं देशम्? सुग्रीवनामको हि वानरराजा धर्मात्मा विनिकृतो भ्राता दुःखितोऽत्र तिष्ठति। तेन महात्मनाऽहं प्रेषितो हनुमान्नाम वानरोऽस्मि। स हि युवाभ्यां सख्यमिच्छति। अस्य सुग्रीवस्य मां सचिवं जानीतम्। कामगः कामचारी चास्मि। केवलं सुग्रीवप्रियकरणात् ऋष्यमूकपर्वतादिह प्राप्तोऽस्मि। नान्यत् किंचित् कर्तव्यमस्ति।'

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

(४)

इत्येतच्छ्रुत्वा रामो लक्ष्मणमब्रवीत् । 'सचिवोऽयं वानरेन्द्रस्य, ममान्तिकागतोऽस्ति। अनेन कृत्स्नं व्याकरणमपि पठितमिति दृश्यते, यतः व्याहरतानेन किंचिदपि नापशब्दितम् ।' एवमुक्तो लक्ष्मणो हनुमन्तमब्रवीत्–'विदिता हि गुणाः सुग्रीवस्य, तमेव वयं मार्गामहः । यत्सुग्रीवबचनाद् ब्रवीषि तत्करिष्यावः इति ।'

तच्छ्रुत्वा हनुमान्पप्रच्छ– 'किमर्थं रामः सानुजो घोरं वनमागतः ?' इति हनूमत्प्रश्नं श्रुत्वा लक्ष्मणेन सर्वोऽपि वृत्तान्तः तस्मै निवेदितः । उवाच च– 'यस्य प्रसादेन सर्वा इमाः प्रजाः प्रसादयेयुः स एष रामः शरण्यस्य वानरेन्द्रस्य सुग्रीवस्य प्रसादमभिकांक्षते ।' इति । करुणमेवं ब्रुवाणं सौमित्रिं हनूमान्प्रत्युवाच । 'दिष्ट्या वानरेन्द्रेणेदृशा द्रष्टव्या जितक्रोधा बुद्धिमन्तो जितेन्द्रिया वीराश्च दर्शनमागताः । सोऽपि सुग्रीवो वालिना राज्याद्विभ्रष्टा कृतवैरश्च । हृतदारश्च भ्राता वने त्रस्तो विनिकृतश्च भृशं युवयोः साहाय्यं करिष्यति इति ।'

हनूमांस्ततो रामलक्ष्मणौ स्वकीयं पृष्ठं आरोपयामास, ऋष्यमूकपर्वतान्मलयगिरिं गत्वा कपिराजाय सुग्रीवस्य रामलक्ष्मणावागतौ इति निवेदयामास ।

सुग्रीवस्तु प्रीत्या राघवमुवाच– 'एष प्रसारितो बाहुर्यदि रोचते मे सख्यम् । बध्यतां ध्रुवा मर्यादा । इति ।' उभौ ततो हस्तौ संपीडय दीप्यमानमग्निं प्रदक्षिणीचक्रतुः वयस्यत्वं चोपाजग्मतुः । सुप्रीतमनसौ च कपिराघवौ तदाऽन्योन्यमभिवीक्षन्तौ तृप्तिं नाभिगतौ । सुग्रीवस्तदा प्रहृष्टवदनो राममुवाच–'हृद्यो मे त्वं वयस्यः । एकं नौ सुखं दुःखं च । विदितो हि मे वृत्तान्तः सर्वस्तवास्माद्धनूमतो मन्त्रिवरात् । हे राम । अहं तव भार्या

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अचिरादेवानयिष्यामि । तेन दुःखाद्वियोगजान्मुक्तो भविष्यसि । अनुमतो जनामि च ह्रियमाणा सीता मया दृष्टेति । तथैव स्वकीयं उत्तरीयं शोभनान्याभरणानि अत्र त्यक्तानि इति मन्ये । अर्हसीदानीं तानि प्रत्यक्षीकर्तुमिति । '

ततो दृष्ट्वा तु तान्याभरणानि वासांसि च रामश्चन्द्रमा इव नीहारेण बाष्पैः संरुद्धोऽभवत् । 'हा प्रिये' इति रुदन् क्षितौ च न्यपतत् । हृदि कृत्वाऽलंकारान् सर्पवद्भृशं निश्वास । लक्ष्मणं चादर्शयत् पुनः पुनर्भूषणानि । तानि दृष्ट्वा लक्ष्मण उवाच—

नाहं जानामि केयूरे नाहं जानामि कुंडले ।
नूपुरे त्वभिजानामि नित्यं पादाभिवंदनात् इति ॥

तदनंतरं दुःखितेन रामेण पृष्ठोऽपि राक्षससंबंधिनं वृत्तान्तं सुग्रीवः किंचिदपि नाशकद्वक्तुम् । परन्तु तदैव स प्रत्यजानात् यत् 'तथा यत्नं करिष्यामि यथा मैथिलीं त्वं शीघ्रं प्राप्स्यसि ।'

इत्युक्त्वा सांत्वयामास च तं—'अलमिदानीं दुःखेन, धैर्यं धारय, मामपि भार्याव्यसनजं दुःखं प्राप्तम् । तथाऽपि न परित्यजे धैर्यम्, न तेषां सुखं भवति ये शोकमनुवर्तन्ते । अतो नैवासि योग्यः शोचितुमिति ।'

शब्दार्थ— अचिरात् = soon उत्तरीयं = uppercloth आभरणानि = ornaments प्रत्यक्षीकर्तुं = to see in person वासांसि = clothes नीहार = mist नूपुर = ornaments of the leg. अलं = enough व्यसनं = sorrow न अपशब्दितं = did not say wrongly शरण्यः = fit to be used as shelter दिष्ट्या = By good luck प्रसारितः = spread हस्तौ संपीडय = shaking hands एकं नौ दुःखं = our sorrows are common.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Lesson– 13

॥ श्रीशिवराज्याभिषेकः ॥

एष पुण्यदर्शनस्मरणो 'रायगडः'। अत्रैव किल भरतभू-स्व-राज्यसंस्थापकस्य सुगृहीतनाम्नः श्रीशिवरायस्य राज्याभिषेक-महोत्सवः समजनि।

गागाभट्टेन क्षेत्रभूमौ महाराजस्य व्रतबन्धो विहितः। अभिषेक-महोत्सवश्च १५९६ मित शालिवाहनशकस्य ज्येष्ठमासे शुद्धत्रयोदश्यां (६ जून १६७४) दुर्गराजे राजदुर्गे निर्वर्तनीय इति निर्धारितमभूत्।

अथ समुपागते तस्मिन् प्रशस्तेऽहनि सुमहत् खलु महोत्सव-संविधानमुत्पताके तस्मिन् राजदुर्गे बभूव। असङ्ख्याः खलु जना महोत्सवदिदृक्षवः प्रतिदिनं राजदुर्गमापुः। वैदेशिका अप्येतस्मिन्नवसरे समुपतस्थुरिति श्रूयते। त्रयोदश-सुवर्णभार-निर्मितं महाराजस्य सिंहासनमासीत्। तस्य नातिदूरमेव हैम-दण्डोच्छ्रिता वृत्तिसाम्यमुपलक्षयन्ती सुवर्णमयी तुला संस्थापिता-ऽऽसीत्। अभिषेक-पात्राणि कलशाश्च सर्वे सुवर्णमया आसन्। राजदुर्गस्य महाद्वारं मङ्गलतोरणेन माहार्हेण समलङ्कृतमभूत्। महाद्वारस्योभयतः पार्श्वे कलभद्वयं द्यौत-तुरग-द्वयं च स्थापि-तमासीत्। तत्र विशेषतः कलभयुगं वीक्ष्य 'समुच्छ्रिततमेऽस्मिन् दुर्गपृष्ठे कथङ्कारमिदमानीतं' इति सर्वे कुतूहलं सविस्मयभाव-हन्ति स्म। अथ घटिकाद्वयमात्रावशिष्टायां रजन्यां, यथा स्थान-स्थितेषु, कलशपाणिष्वष्टामात्येषु, महाराजः सह महिष्या मुक्ता-मणिमयोपान्तशुभ्रछत्रवितानं हैमं सिंहासनमारुरोह। ततश्च मोरो-पन्तप्रभृतिभिरष्टामात्यैर्गागाभट्टप्रभृतिभिश्च विप्रवरैर्वेदमन्त्रो-च्चारणपूर्वकं सकलसरितां सरित्पतेश्च पावनेनाम्भसा श्रीशिव-रायः स्वराज्यसिंहासनेऽभिषिक्तः। तत्क्षण एव 'विजयतां क्षत्रिय-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कुलावतंसः श्रीशिवछत्रपतिमहाराजः सिंहासनाधीश्वरः' इति जय-घोषमिश्रितो मङ्गलवाद्यध्वनिकरः सुदूरं दिशो व्याप्यात्यतिष्ठत् ।

अभिषेकदिनादारभ्य 'स्वस्ति-श्रीराज्याभिषेकशक' इत्याभिधानेन संवत्सरगणनाऽभिनवा प्रवर्तिता । तस्य साम्प्रतं २७५ तमं वत्सरं विद्यते । सा च 'शिवशक' इत्यभिधानेन सत्प्रत्युपलक्ष्यते । एतत्प्रसङ्गेन महाराजेन राज्यव्यवहारकोशं कारयित्वा सर्वा यावनीः प्रदसंज्ञाः निःसारिताः संस्कृताश्च तत्स्थले प्रवर्तिताः । महोत्सवप्रसङ्गेऽस्मिन् द्वात्रिंशल्लक्षाधिक-कोटि-'होन' प्रमितो व्ययोऽभूदिति प्राहुः ।

अस्मादभिषेकदिनादारभ्य 'नासौ कोऽपि तस्करनृपः, किन्तु भूर्धाभिषिक्तः सिंहासनाधीश्वरोऽयं सार्वभौमः' इति सर्वत्र प्रथितं महाराजस्य शासनम् । मुद्रा चास्य प्रणतसामन्त-चूडामणि-राजिता विराजमाना सर्वैरादृयते स्म—

प्रतिपच्चन्द्ररेखेव वर्धिष्णुर्विश्ववन्दिता ।
शाहासुतस्य मुद्रयं शिवराजस्य राजते ॥ इति ॥

Lesson– 14

Golden Aphorisms of Arya Chanakya which deserve to be remembered and acted upon.

१ सुखस्य मूलं धर्मः = The root of happiness is self sacrifice.

२ धर्मस्य मूलं अर्थः = The root of self–sacrifice or Dharma is wealth.

३ अर्थस्य मूलं राज्यम् = The root of wealth is kingdom.

४ राज्यस्य मूलं इन्द्रियजयः = The root of kingdom is to conquer senses.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

५ इन्द्रियजयस्य मूलं विनयः = The root of conquering the senses is good education

६ विनयस्य मूलं वृद्धोपसेवा = The way of good education is in service to elders.

७ वृद्धसेवाया विज्ञानं = By serving the elders one will have experienced knowledge.

८ विज्ञानेन आत्मानं संपादयेत् = one should posses this experienced knowledge invariably.

९ संपादितात्मा जितात्मा भवति = one who has this experienced knowledge, will have subdued mind.

१० जितात्मा सर्वार्थैः संयुज्यते = A man of suldned mind will have all kinds of wealth.

११ अर्थसंपत् प्रकृतिसंपदं करोति = This attainment of wealth will lead to natural wealth i. e., control of state or governing position.

१२ प्रकृतिसंपदा हि अनायकमपि राज्यं नीयते = This governing position i. e. a minister in this position will lead the state even without a principal ruler.

१३ प्रकृतिकोपः सर्वकोपेभ्यो गरीयान् = The anger of the subjects is the most fearful one.

१४ अ-विनीत स्वामि-लाभात् अस्वामिलाभः श्रेयान् = It is better to have no ruler or king instead of having an uneducated and immoral ruler or king.

१५ संपाद्य आत्मानं, इच्छेत् सहायवान् = After one has acquired for himself the wealth of knowledge one should gain the help of assistants.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

१६ नासहायस्य मन्त्रनिश्चयः = one who has no assistants cannot settle anything.

१७ नैकं चक्रं परिभ्रमति = one wheel cannot taka a round by itself.

१८ सहाय्यः समसुखदुःखः = Assistant is one who is with one in happines or sorrow.

१९ मानी, प्रतिमानिनं आत्मनि, द्वितीयं मन्त्रं उत्पादयेत् = A proud man competing with another proud man can create another intrigue.

२० अविनीतं स्नेहमात्रेण न मन्त्रे कुर्वीत = A man unfit should not be taken into counsel though he is acquainted person.

CC-O. In Public Domain. Digitized by eGangotri

Lesson– 15

रामायणं सुन्दरकाण्डम्

अब हनुमान् मनसा रामं प्रणम्य, सहसा समुद्रस्य सन्तरणार्थं उत्पपात ।

अत्रान्तरे सागरः रामस्य तं दूतं दूरं गन्तुं उद्यतं ज्ञात्वा, तस्य विश्रान्ति चिन्तयामास । स सागरः मैनाकं पर्वतं सत्वरं समुपेत्य प्रोवाच । हे गिरिश्रेष्ठ ! रामकार्यार्थं मारुतिः आकाशमार्गेण गच्छति, अतोऽस्य विश्रान्त्यै एवं स्वशिखराणि दर्शयितुं अर्हसि । स मैनाकः पर्वतः तथा कृतवान् । मैनाकेन स्वशिखराणि उर्ध्वभागे प्रसारितानी ।

तानि मार्गे समुन्नतानि शिखराणि दृष्ट्वा, हनूमान् तत् विघ्नं अस्तीति मत्वा, तानि शिखराणि ताडितुं आरब्धतान् । तदा स पर्वतः तं अवदत् । हे कपिश्रेष्ठ ! सागरः तव विश्रान्त्यै मां विसृष्ट तव प्रीतिं अभिलषति । अतः मम शिरसि किंचित्कालं विश्रामाय स्थातुं अर्हसि ।

श्रुत्वा एतत् पर्वतभाषणं हनूमान् प्रत्यभाषत । भ्रातः ! मया सागरस्य तव च इयं पूजा गृहीता । मम शरीरे कश्चिदपि परिश्रमः नास्ति । अतः मिथ्या कालक्षेपेण किं कार्यम् ? इति उक्त्वा मैनाकं पर्वतं अंगुल्या स्पृष्ट्वा सत्वरं अग्रे जगाम । अथानेन कर्मणा परितुष्ट इन्द्रः मैनाकस्य वरं प्रादात् । येन तस्य सर्वं वज्रमयं संपूर्णतया विनष्टम् ।

अनन्तरं सुरगणप्रेषिता सुरसा करालरूपं धृत्वा हनूमतः बलं ज्ञातुं सहसा तत्र आगता । सा स्वकीयं मुखं विवृत्य मारुतिं प्रोवाच । विष्टया अद्याहं भोजनं पश्यामि । एतदाकर्ण्य हनूमान् तां प्रत्यवदत् । भद्रे ! किंचित्कालं प्रतीक्षस्व । रामकार्ये कृते स्वयमेव अहं त्वां अभ्येत्य तव मुखे प्रवेक्ष्यामि । तच्छ्रुत्वा साऽब्रवीत् । हे मारुते ! नाहं त्वां अद्य प्राप्तं त्यक्ष्यामि । एतदाकर्ण्य हनूमान् विहस्य प्रोवाच । मुखं प्रसारय । अहं तव आननं प्रविशामि । एवं तेन उक्ता सा दशयोजनं स्वमुखं चकार । एतदवलोक्य हनूमान् क्षणेनैव अंगुष्टमात्रो भूत्वा तस्य आननं प्रविवेश ।

CC-O. In Public Domain. Digitized by eGangotri

ततो मनोजवः स हनूमान् तस्या मुखात् बहिः निर्गत्य तां प्रोवाच। हे सुरसे! मया त्वद्वचः सत्यं कृतम्। सांप्रतं गमनाय अनुमतिं देही। तत् श्रुत्वा सा देवी स्वेन रूपेण वानरं प्रोवाच। हे वानरश्रेष्ठ! कार्यसिद्धिर्यथासुखं गच्छ। एवं हनूमतः सुदुष्करं कर्म दृष्ट्वा सर्वाणि भूतानि 'साधु साधु इति' तं प्रशशंसुः।

ततो मारुतिः रावणस्य लंकां गन्तुं प्रस्थितः। किंचित् कालात् ऊर्ध्वं स लंकाया उत्तरं द्वारं प्राप्तः। तदा सूर्यः अस्तं गतः।

ततो लंकानगर्याः संरक्षणकर्मणि नियुक्तां राक्षसीं विजित्य लंकां प्रविवेश। निशायां उदिते चन्द्रमसि स कपिः राक्षसानां भवनानि प्रविवेश। रावणस्य अन्तःपुरे प्रविश्य तत्सर्वं दृष्टवान्। तत्र सः सीतां न दृष्ट्वा चिन्तितवान्! इयं सकला लंकापुरी मया दृष्टा, अत्र अपि सीता न दृश्यते, अतः सागरलंघनं वृथैव जातमिति मन्ये।

मया जानकी न दृष्टा इति विषवत् वचनं श्रुत्वा रामो जीवितं त्यक्ष्यति इति व्यक्तम्। अतोऽहं सीतार्थं पुनर्यत्नं करोमि। यदि सा न लब्धा तर्हि रावणस्य बद्धं करिष्यामि। इति निश्चित्य तस्मात् स्थानात् अशोकवाटिकां जगाम। तस्यां वाटिकायां राक्षसीभिः परिवेष्टितां पीतवसनधारिणीं निर्मलां क्षीणां तपस्विनीं सीतां ददर्श। सैव सीतेति तर्कयामास। स तां दृष्ट्वा आह। नूनं रामो भाग्यवान् यस्य इयं भार्या। एषा अपि भाग्यशालिनी यस्या भर्ता रामचन्द्रः। मयापि अस्या दर्शनेन भाग्यवत्त्वं प्राप्तम्। ततः सोऽचिन्तयत् अस्याः सीतायाः हेतोः वाली हतः। अस्या एव कारणेन त्वदूषणादयो राक्षसा निहताः।

हनूमान् मनसि अचिंतयत्। हे सीते! त्वं धन्या। या सर्वान् भोगान् परित्यज्य निर्जनं वनं प्रविष्टासि। भर्ता हि नार्या भूषणम्।

अथ प्रभाते ब्रह्मरक्षसा नं वेदघोषं शुश्राव।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sanskrit Self Teacher

By

Padmabhushan Pt. Shripad Damodar Satwalekar

(English Edition)

1– The easiest way to the study of Sanskrit is shown in this Series.

2– One, who devotes half an hour daily to these books, can learn within a period of six months that much of Sanskrit, so as to follow Mahabharat and Ramayana easily.

3– Hundreds of students have been so far benefited by this series.

4– The Series comprises 18 parts.

Price– Full Set 18 Parts Rs. 36.00
(Rs. 2.00 for each part).

Hurry up. Make haste to place your order for the books with—

The manager
Swadhyaya Mandal
Killa–Pardi
Dist. Valsad (Gujarat)

Sri Vidyabharathi Book Centre, Shringeri

Printer and Publisher : V. S. Satwalekar,
Bharat Mudranalaya, PARDI. (Bulsar)